श्री

संस्कृत-सरणिः

प्रथमो भागः

केशवप्रसादमिश्रः

१९३२

संस्कृतसरणिः

प्रथमो भागः

कर्त्ता

केशवप्रसादमिश्रः

हिन्दूविश्वविद्यालयस्याध्यापकः

काशीवास्तव्यः

प्रकाशक

नन्दकिशोर एण्ड ब्रदर्स,

पब्लिशर्स, बनारस।

प्रथम संस्करण] १९३२ [मूल्य ॥)

Printed by D. L. Nighosker,
at Shri Lakshmi Narayan Press, Benares.

FOREWORD

About fifteen years ago I had the first occasion to observe a Sanskrit lesson conducted in the Direct Method by Pt. Keshava Prasad Misra in a class of beginners. It was a rich treat to me. Since then I wished very much that there were text books on these lines. Subsequently, however, I came accross several Sanskrit Readers written according to modern educational principles. Some of them were prescribed by the Department for classes VI to VIII. But none of them fulfilled my expectations, though they contained much useful matter. Most of them were written in imitation of Direct Method English Readers and as such they could not maintain the purity of Sanskrit style. Now it gives me great pleasure to see the right man in the right place. Pt. Keshava Prasad Misra is a born teacher and profound Sanskrit scholar. His is the purest Sanskrit style and he has presented the lessons in a most natural way. The lessons in his "Sanskrit Sarani" have been very judiciously selected and carefully graduated according to the difficult stages. Every lesson in the first part is accompanied by a short lesson on grammar bearing on the declension of such words and the conjugation of such roots only as are absolutely necessary for a clear grasp of the text. In this part every lesson is also followed by a series of questions to ensure preparation of the text by the students,

In the second part a little more difficult and connective passages from the Ramayana, the Mahabharata and similar other standard books have been arranged in a progessive order. But grammar has been explained at the end of the book in such details as the students of Class VIII can be reasonably expected to follow.

The author seems to have taken great pains in his selection and arrangement of these lessons. Like a clever bee he has collected honey from the "Nandan Kanan" of Sanskrit literature. These lessons will not only teach Sanskrit language and grammar in an easy way without much trouble on the part of the student; but will also instill into him the essence of Hindu culture. Generally students do not relish abstract lessons on morality or religion, but I feel confident that every student of this book will enjoy immensely, particularly the last lesson on "प्रश्नोत्तरमाला", which embodies all the ten "Lakshanas" of Dharma in pithy sayings but in delicious language.

CENTRAL HINDU SCHOOL,
BENARES.
The 2nd Nov., 1932.

KALI PRASANNA CHAKRAVARTI
ADDITIONAL HEAD MASTER,
Central Hindu School.

अध्यापकान् प्रति काचन निवेदना

आर्याः सधर्माणः,

महर्षिभिरन्वाख्याता संस्कृतं नामेयं दैवी वाक् तथा प्रतिष्ठापितापि परमेष्ठिना परिगृहीतापि तपःस्वाध्यायनिरतैः पूर्वसूरिभिः प्रसाधितापि वाङ्मयमणिकारैः कालिदासादिभिः किमिति दूरादपि दवीयः क्रियतेतरामस्माकं तत्पुत्रपुत्राणां सान्निध्यादित्येषा पृच्छा कन्न विपश्चितं चिन्तायां विनिक्षिपेत् ?

चिन्त्यमानानि चास्य महतो विपर्यासस्य कारणानि तावदित्थं स्फुरन्ति—

१. साधनसम्पन्नानां संस्कृतशिक्षापराङ्मुखत्वम् ।

२. आङ्ग्लविद्यालयेषु संस्कृतप्रतिपक्षविषयाणां समयानुकूल्यमुपयोगातिशयोक्तिश्च ।

३. तत्र पाठ्यत्वेन निर्दिष्टपुस्तकानां शिष्टापरिगृहीतसंस्कृताभाससंदृब्धविजातीयार्थभूयस्त्वम् ।

४. अविज्ञानानुगृहीतमिति, पुराणरीतिकदर्थितमिति, रटनपटुताप्रधानमिति, दुर्निवारव्याकरणग्रहगृहीतमिति, लोकानभिज्ञमन्दमन्थरजनाधिकृतमिति भूयांसोऽध्यापनमधिकृत्य प्रवर्त्तिताः प्रवादाः ।

तेषु पूर्वयोर्द्वयो राजाधीनप्रतीकारत्वादस्मत्प्रयत्नानिवर्त्यत्वे अभ्युपगतेऽपि किं नास्माभिरुत्तरयोः प्रतिषेधाय प्रयतनीयम् ?

एतस्यां पुनः **संस्कृतसरणौ** अध्येतव्याः प्रपाठका आत्मना वपुषा च तथा विन्यस्ता यथा बहोः कालादध्यापकैरनुकम्पितां विवृतिम् (Translation Method) अद्यत्वे शिक्षाविज्ञानविदामपि बहुमतं व्यवहारम् (Direct Method) च यथायथं सममेव उपकुर्वीरन्निति ।

यत्सत्यं विवृतिव्यवहारयोर्व्यवहार एव साधीयान् ।
शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च ।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

इत्यत्राभिहितेषु शक्तिग्राहकेषु व्यवहारस्यैव नागेशादिभिर्मञ्जूषादौ शिरोमणित्वेन व्यवस्थापनात् । बालोऽपि खल्वपाठितोऽपि व्यवहारेणैव गृहभाषामभ्यस्यति । अभ्यर्हयन्ति च—

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य 'गामानय' इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य "सास्नादिमत्पिण्डानयनमर्थः" इति प्रथमं प्रतिपद्यते अनन्तरं च 'गां बधान' 'अश्वमानय' इत्यादावावापोद्वापाभ्यां गोशब्दस्य 'सास्नादिमानर्थः' आनयनपदस्य 'आहरणमर्थः' इति संकेतमवधारयति ।

इत्यादिसाङ्गवर्णनामुखेन व्यवहारमेवालङ्कारिका अपि ।

तद्यदि व्यवहारमनुगृह्णद्भिस्तत्रभवद्भिरध्यापकैः सरणिरियमनुस्रियेत संभावयामि च्छात्रा अपि बाढमनुरक्ता न संस्कृताद् विरक्ततामासादयेयुर्नापि सहभुवा भाषणकौतुकेन गाढमावर्जिता व्याकरणविभीषिकां वाऽनुभवेयुः ।

अत्र सरणावारम्भादेव संस्कृतस्वभावमनुभूय विनियुक्तानि वाक्यानि गुणिनिकया व्यवहृतानि चेद्बोधपूर्वमेव तत्र व्युत्पत्तिं प्रगुणयेयुः कुर्युश्च सुकुमारमतीन् बालानपि भाषासौष्ठवनिपुणकर्णान् । पञ्चमप्रपाठकमारभ्य विरचितानि यान्युदाहरणपद्यानि तान्यनायासेनैव च्छात्राणां जिह्वासु नृत्यन्ति निदर्शनोपकारमावहेयुः । अन्तरान्तरा च पादटिप्पणीषु दिङ्मात्रेण निर्दिष्टा अपभ्रंशा अन्यत्रापि परिचायिताः संस्कृतस्य विप्रकर्षमपकर्षन्तश्छात्रेषु भाषासाम्यदृष्टिं मूलादेवोन्मीलयेयुरित्येता अन्याश्च शतं संभावनाः श्रीमत्स्वेवायतन्त इति स्मरयन् विरमति—

काशी, विजया १९८९ } कश्चन भवतां विधेयः
केशवप्रसादमिश्रः ।

विषय-सूची ।

प्रपाठकाः—



सुन्दरः कृष्णः खेलति

श्रीः

संस्कृतसरणिः

प्रथमो भागः

प्रथमः प्रपाठकः

रामः चलति ।
हसति सः ।
बालकः सुन्दरः ।
चतुरः कृष्णः ।
सुन्दरः कृष्णः खेलति ।
रामः बालकः ।
बालकः रामः वसति ।
सः बालकः लिखति ।

पठति देवदत्तः ।
मेघः गर्जति ।
कुक्कुरः बुक्कति ।
वर्करः चरति ।
सर्पति सर्पः ।
फलति वृक्षः ।
वहति नदः ।

कः चलति ? कः सुन्दरः ? कः किं करोति ?

रामः चलति । कृष्णः सुन्दरः। बालकः लिखति।
कुक्कुरः बुक्कति । सर्पः सर्पति । देवदत्तः पठति ।
वृक्षः फलति । वर्करः चरति।

पवनः चलति । रथः चलति । चलति चन्द्रः ।
वृक्षः प्रचलति । लोकः विचलति। उच्चलति पथिकः ।

गर्दभः घासं चरति । खलः सज्जनं हसति ।
धर्मः सुखं फलति । वेदं पठति ब्राह्मणः ।
सः पत्रं लिखति । देवदत्तः शब्दम् उच्चरति ।

	प्रथमा (पुँल्लिङ्गस्य)	प्रथमःपुरुषः	प्रथमा (पुँ०सर्वनाम्नः)	प्रथमःपुरुषः
एक०	रामः	चलति	सः	हसति
द्वि०	रामौ	चलतः	तौ	हसतः
बहु०	रामाः	चलन्ति	ते	हसन्ति



बालाः क्रीडनकं याचन्ति

द्वितीयः प्रपाठकः

बालकौ लिखतः। कुक्कुरौ बुक्कतः।
कृष्णमुकुन्दौ खेलतः। छात्रौ पठतः।
हसतः तौ। माधवः नमति।
कौ मिलतः? गोविन्दः नमति।
देवदत्तयज्ञदत्तौ मिलतः। नमतः तौ।
कौ रिङ्गतः? अश्वौ धावतः।
सर्पौ रिङ्गतः। वृषभौ शकटं कर्षतः।
चरतः खरौ। काकौ कटुकं रटतः।
गजौ गर्जतः। गायकौ गीतं गायतः।

जनाः मूर्खं हसन्ति। पण्डितं लोकः प्रशंसति।
धर्मः पापं जयति। अजाः तृणं खादन्ति।
दरिद्राः धनम् इच्छन्ति। कोकिलाः मधुरं कूजन्ति।
ईश्वरः जनान् रक्षति। बालाः क्रीडनकं याचन्ति।
वृद्धाः संसारं निन्दन्ति। नृपः लोकान् भरति रक्षति च।

कौ किं कुरुतः? वृषभौ किं कर्षतः? काकौ किं कुरुतः? जनाः कं हसन्ति? लोकः कं प्रशंसति?

---

१. cf. छकड़ा।


दरिद्रौ किं याचतः ? ईश्वरः किं न रक्षति ? अजौ कुत्र चरतः ? बालकौ किं कुरुतः ? बालाः किं कुर्वन्ति ?

चोरः धनं हरति । भिक्षा मानं हरति ।
पुत्रः अंशं हरति ।
चोरं प्रहरन्ति राजपुरुषाः । परिहरति दुर्जनं सज्जनः ।
कूर्मः अङ्गानि संहरति । उपहरति शिष्यः पुष्पाणि ।
अनुहरति पौत्रः पितामहम् । उदाहरति अध्यापकः
विहरति कृष्णः । श्लोकम् ।
उद्धरति जनान् हरिः ।

उलूकः सूर्यं न पश्यति । बाला मालां रचयति ।
सीता वनं गच्छति । भार्या भक्तं[१] पचति ।
विद्या नरं भूषयति । बालिके नृत्यतः ।
व्यासः कथां कथयति । वार्त्ता[२] जनं रञ्जयति ।
वर्षाः धान्यानि जनयन्ति ।

	प्रथमा (स्त्रीलिङ्गस्य)	प्रथमा (नपुंसकलिङ्गस्य)
एकवचनम्	बाला, सा	तृणम्, तत् ।

१. cf. भात । २. cf., बात ।



अजाः तृणं खादन्ति

द्विवचनम्	बाले, ते		तृणे, ते ।
बहुवचनम्	बालाः, ताः		तृणानि, तानि ।

द्वितीया

	(पुँ०)	(स्त्री०)	(न०)
एक०	शकटम्, तम् ।	मालां, तां ।	तृणं, तत् ।
द्वि०	शकटौ, तौ ।	माले, ते ।	तृणे, ते ।
बहु०	शकटान्, तान् ।	मालाः, ताः ।	तृणानि, तानि ।

	प्रथमा (त्रिलिङ्गस्य)	मध्यमः पुरुषः
एक०	त्वम्	लिखसि
द्वि०	युवाम्	लिखथः
बहु०	यूयम्	लिखथ

तृतीयः प्रपाठकः ।

त्वं सूर्यं पश्यसि, अन्धाः न पश्यन्ति । युवां चलथः, ते खञ्जाः न चलन्ति । यूयं ग्रन्थान् रचयथ, मूर्खाः न रचयन्ति । त्वं नृत्यसि, बालिका पश्यति । यूयं पठथ, अध्यापकः पाठयति । आम्राणि पतन्ति, त्वं न खादसि ? गर्दभाः उन्नदन्ति, त्वम् आकर्ण-

यसि ? वानराः फलानि भक्षयन्ति, युवां न वारयथः। चौराः धनं लुण्ठन्ति, त्वं न रक्षसि । अध्यापकः पृच्छति, यूयं किं मौनं भजथ ? घोटकाः द्रवन्ति, त्वं किं न अपसरसि ? बालः क्रन्दति[1], त्वं किं न लालयसि ? छात्राः पठन्ति, यूयं हसथ। ईश्वरः लोकान् सृजति, त्वं किं न तं प्रणमसि ?

अन्धः किं न पश्यति ? खञ्जाः किं न चलन्ति ? बधिरः किं न आकर्णयति ? मूकः किं न वदति ? यदा त्वं नृत्यसि तदा बालिका किं करोति ? त्वं वानरान् किं वारयसि ? त्वं किमिति अपसरसि ? त्वं धनं केन कारणेन रक्षसि ?

शुकाः उत्पतन्ति ।
खलः सज्जनान् अपवदति।
नृपः दूतं विसृजति।
त्वं किमिति मङ्गलकाले वाष्पम् उत्सृजसि ?

कुलक्षणः त्वं भूतलम् उल्लिखसि ।
छात्रः विद्याम् अधिगच्छति ।
साक्षरः निरक्षरं विगायति
युवाम् इतिहासं विस्मरथः ।

---

१. cf., काँदना = रोना ।

छत्रेण सूर्यातपं वारयन्ति जनाः। सः कर्णाभ्यां बधिरः पादेन च खञ्जः। दण्डेन घटं करोति कुम्भकारः। यत्नेन कार्यं सिध्यति। पादाभ्यां गच्छामः। नासिकया शिङ्घामः (जिघ्रामः)। हस्ताभ्यां स्पृशामः। अहं कलमेन लिखामि, सः नखैः विलिखति। पादैः पिबति पादपः। जलेन सिञ्चति पादपान्। कंङ्कतिकया[1] केशान् प्रसाधयन्ति बालाः। मालाभिः देवम् अर्चयति। वयं दन्तैः चर्वयामः॥ शरीरं चिन्तया जीर्यति। जटाभिः तापसः किन्तु चरित्रेण महाशठः। अलं महीपाल! तव श्रमेण। आवां कन्याभ्यां सह पठावः। पत्रैः लसति द्रुमः। नेत्राभ्यां किं न पश्यसि?

तृतीया

	(पुँ०)	(स्त्री०)	(न०)
एक०	तेन, पादेन।	तया, नासिकया।	तेन, छत्रेण।
द्वि०	ताभ्यां, कर्णाभ्याम्।	ताभ्यां, कन्याभ्याम्।	ताभ्यां, नेत्राभ्याम्।
बहु०	तैः, दन्तैः।	ताभिः, मालाभिः।	तैः, पुत्रैः।

1. cf., कंगी।

	प्रथमा (त्रिलिङ्गस्य)	उत्तमः पुरुषः
एक०	अहम्	लिखामि ।
द्वि०	आवाम्	पठावः ।
बहु०	वयम्	चर्वयामः ।

अन्या वर्त्तमानकालिकी क्रिया

	प्रथमः पुरुषः	मध्यमः पुरुषः	उत्तमः पुरुषः
एक०	सेवते	सेवसे	सेवे
द्वि०	सेवेते	सेवेथे	सेवावहे
बहु०	सेवन्ते	सेवध्वे	सेवामहे

चतुर्थः प्रपाठकः ।

स यं यं पश्यति तं तं याचते । यः प्रचुरं धनं वितरति तं याचकाः प्रशंसन्ति । निजैर्गुणैः प्रीणयन्ति बुधाः । आवां मन्दोष्णेन जलेन धूलिधूसरौ पादौ प्रक्षालयावः । आज्ञाकरो दासः मलिनं धौतं फेनकेन धावते । आर्द्रेणेन्धनेन (आर्द्रेण + इन्धनेन) कृशरान् कथं पचसि ? सिंहस्तीक्ष्णैर्नखैर्विशालान् गजकुम्भान् विदारयति । वयं नानावर्णानि चित्राणि विस्फारितैर्नयनैर्निरीक्षामहे । चिपिटया नासिकया

मुखसौन्दर्यं नश्यति। मूर्खेण जातेन कुलं हीयते। 'यो विद्यामधिगच्छति स लौहचणकान् चर्वयति" इति प्रायोवादः शीतकान् छात्रान् भीषयते न पुनरुष्णकान् (पुनः+उष्णकान्), ते तु श्रमेण बुद्धिवैभवेन च सर्वं साधयन्ति। सर्वः श्रुतिसुखेन स्तोत्रेण तुष्यति न पुनः सत्येनापि हृदयदाहकेन परीवादेन। जटिलान् कशान् दृढदन्तुरया कङ्कतिकया किमिति न विशोधयसि? येन गुणेन त्वं तं पूजयसि तं गुणं कथं स्वयमेव नाधिगच्छसि? बुधस्तरति दुर्गाणि मूर्खः पतति संकटे। प्रयत्नेन विना लोके न किञ्चिद् लभते जनः।

निजैर्गुणैः के तोषयन्ति? याचकाः कं प्रशंसन्ति? त्वं शीतकाले कीदृशेन जलेन पादौ प्रक्षालयसि? त्वं कस्मिन् काले मन्दोष्णेन जलेन पादौ प्रक्षालयसि? त्वं कीदृशौ पादौ प्रक्षालयसि? कीदृशो दासः आज्ञाकरो भवति? गजाः कुत्र वसन्ति, सिंहाश्च तान् कैः विदारयन्ति? पण्डितेन जातेन कुलं कीदृशं भवति? केन कारणेन जनः स्तोत्रेण तुष्यति न पुनर्निन्दया? केन केन गुणेन जनः पूज्यो भवति?

नृपः प्रभवति ।
सर्वः दरिद्रं परिभवति ।
अहं दुःखमनुभवामि ।
उच्चं नीचं पृथग् बालाः प्रवदन्ति न पण्डिताः ।
आचारेण वचनं संवदति ।
पञ्जरस्थः शुकः शिशुवचनमनुवदति ।
अज्ञः स यः परं परिवदति ।
तर्थेन गङ्गामवतरति ।
धनैरापदं मानवा निस्तरन्ति ।
चाणक्यः प्रतिज्ञां निस्तरति ।
वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे ।
शोकसागरमुत्तरामि ।
परीक्षामुत्तरन्ति कृतश्रमाः ।

रामोऽध्ययनाय कुत्र गमिष्यति ? इदानीं रात्रिः, प्रातः सूर्य उदेष्यति । त्वं कस्मै प्रयोजनाय गच्छसि ? वृद्धो जनकस्त्वां स्मरिष्यति । उत्पन्नो बालः शरीरधारणाय मुखेन स्तनं धास्यति, जिह्वया स्वादयिष्यति, गलेन निगलिष्यति[1], नेत्राभ्यां रूपं निभालयिष्यति[2], कर्णाभ्यां शब्दमाकर्णयिष्यति[3], नासिकया गन्धं शिङ्घिष्यति[4], काले जातैर्दन्तैश्चर्वयिष्यति[5] च । सा बाला लज्जया जलाय त्वां न याचिष्यते । वयं बोधाय व्या-

१. cf., निगलना । २. cf., निहारना । ३. cf., अवनिप अकनि राम पगुधारे । ४. cf., सूँघना । ५. cf., चबाना ।

करणं पठिष्यामः। सत्यं वदिष्यति बुधो नो चेत् मौनं भजिष्यति।

चतुर्थी

	(पुँ०)	(स्त्री०)	(न०)
एक०	तस्मै, बोधाय।	तस्यै, कन्यायै।	तस्मै, अध्ययनाय
द्वि०	ताभ्यां, लंकेश-मेघनादाभ्याम्।	ताभ्यां, सुताभ्याम्।	ताभ्यां, सुखदुःखाभ्याम्।
ब०	तेभ्यः, निरपराधेभ्यः।	ताभ्यः, प्रजाभ्यः।	तेभ्यः, सुखेभ्यः।

	द्वितीया (त्रिलिङ्गयोः)	तृतीया („ „)	चतुर्थी („ „)
एक०	त्वां, त्वा। मां, मा।	त्वया। मया।	तुभ्यं, ते। मह्यं, मे
द्वि०	युवां, वाम्। आवां, नौ।	युवाभ्यां। आवाभ्याम्।	युवाभ्यां, वाम्। आवाभ्यां, नौ।
ब०	युष्मान्, वः। अस्मान्, नः।	युष्माभिः। अस्माभिः।	युष्मभ्यं, वः। अस्मभ्यं, नः।

भविष्यत्कालिकी क्रिया

	प्रथमः पुरुषः	मध्यमः पुरुषः	उत्तमः पुरुषः
एक०	दास्यति	करिष्यसि	वदिष्यामि
द्वि०	वदिष्यतः	कोपिष्यथः	उपहरिष्यावः

ब०	व्याहरिष्यन्ति	यास्यथ	पठिष्यामः

अन्या भविष्यत्कालिकी क्रिया

	प्रथमः पुरुषः	मध्यमः पुरुषः	उत्तमः पुरुषः
एक०	सेविष्यते	सेविष्यसे	सेविष्ये
द्वि०	सेविष्येते	सेविष्येथे	सेविष्यावहे
ब०	सेविष्यन्ते	सेविष्यध्वे	सेविष्यामहे

पञ्चमः प्रपाठकः

नमः श्रीवासुदेवाय गोविन्दाय नमोनमः ।
धनं दास्यति कन्यायै विवाहसमये पिता ।
लङ्केशमेघनादाभ्यामलं श्रीरामलक्ष्मणौ ।
स्वस्ति भूपाय दुर्भिक्षे दरिद्रान् यो भरिष्यति ।
तृणाय मन्यसे मूढ ! आचार्यवचनं यदि ।
किं करिष्यसि वृद्धत्वे धर्माय च सुखाय च ।
प्रजाभ्यः स्वान् प्रियान् प्राणानपि हास्यति पार्थिवः ।
युवां निरपराधेभ्यो वृथा कोपिष्यथः कथम् ?
सत्कारेण प्रदत्तं मे शाकमेवातिरोचते ।
न मोदकोऽपि स्वदते निकारेण समर्पितः ॥

आवामुपहरिष्यावः सुताभ्यां शुभ्रशाटकान्[1] ।
स्वदेशनिर्मितैः सूत्रैः प्रोतान्[2] देशिककौलिकैः[3] ॥
आचार्यौ शिष्यवर्गाय शिष्यधर्मं वदिष्यतः ।
जलाय गङ्गां पुष्पेभ्य उद्यानं किं न यास्यथ ?
प्राप्ताभ्यां सुखदुःखाभ्यां प्रभविष्यति यो नरः ।
न तं हर्षो विषादो वा कदाप्यभिभविष्यति ॥
स्वागतं व्याहरिष्यन्ति मह्यमभ्यागताय ते ।
तेभ्यो हितं वदिष्यामि सुखेभ्यो यद् भविष्यति ॥
अकिञ्चनोऽपि स्पृहयामि नाहं
कदापि वित्ताय पराजिताय ।
स्तोकं च यस्मै खलु धारयामि
तस्मै प्रदातुं प्रयते सदैव ॥

पिता कस्यै कदा धनं दास्यति ? रामलक्ष्मणौ काभ्यां समर्थौ ? कीदृशाय नृपाय स्वस्ति ? यः प्रजाः न भरति यो वा न रक्षति स कीदृशो भूपः ? य आचार्योपदेशं तृणाय मन्यते स वृद्धत्वे किं करोति ? त्वं सापराधेभ्यः कुप्यसि निरपराधेभ्यो वा ? कीदृशीभ्यः प्रजाभ्यो नृपालः

---

१. cf. साड़ी । २. cf. पोत । ३. cf. कोरी = जुलाहा ।

प्राणान् त्यजति? कीदृशो राजा प्रजाभ्यः प्राणान् हास्यति? तुभ्यं शाकं रोचते मोदको वा? मोदको रोचते चेत् कीदृशः? किम् अवमानेन प्रदत्तं स्वीकरिष्यसि? कौलिकः कः? यस्तन्तुभिर्वस्त्रं वयति स कौलिकः, अन्यो वा? देश्येन सूत्रेण कृताय पटाय स्पृहयसि विदेश्येन वा? स कस्मै प्रयोजनाय गङ्गां गच्छति कस्मै वा उद्यानम्? कीदृशं नरं हर्षो विषादो वा न अभिभवति? ये अभ्यागताय स्वागतं व्याहरन्ति ते कीदृशाः पुरुषाः? त्वं तस्मै कियद्धनं धारयसि? अधिकम् अल्पं वा? यदि अधिकं धारयसि तर्हि प्रतिदानाय प्रयतिष्यसे न वा?

उन्मत्तः प्रलपति।
देवदत्तो मया सह संलपतु।
त्वं शोकेन मा विलप।
सायंकाले बलीवर्दा गोष्ठं प्रविशन्तु।
दरिद्रः खट्वां न लभते, स कटे एव संविशतु।
यश्छात्र इन्द्रियसुखानि निर्विशति सोऽध्ययनात् पराजयते।
शङ्का मूढमाविशति न पण्डितम्।
आसने उपविश, भूतले कथं लुठसि?

शिष्याः सावधाना भवन्तु। ते प्रातरेव विष्टरादुत्तिष्ठन्तु, शरीरकार्याणि कृत्वा पाठशालां

गच्छन्तु पठन्तु च। अध्यापकमुखाद् गलितानि वाक्यामृतानि कर्णाभ्यां पीत्वा तृप्यन्तु। छात्राः परस्परं स्निह्यन्तु बन्धुवद् आचरन्तु च। यथा सहोदरास्तथैव सतीर्थ्या इति प्रायोवादस्तिष्ठतु—सहोदरेभ्योऽपि वराः सतीर्थ्या इति मतं प्रचलतु। यूयं भयाद् लोभाद् वा नीतिपथं मा त्यजत। रात्रौ वृथा ग्रामाद् ग्रामं मा भ्रमत। तिष्ठतु दुग्धम्, पिब त्वमुदकम्। कोऽपि कानपि प्रश्नान् पृच्छतु वयमुत्तराणि वदिष्यामः। त्यज दुर्जनसंसर्गं भज साधुसमागमम्। किं गृहाद् आपणं गच्छानि उत आपणाद् गृहम्? सायं पाठशालाया अत्रैव आगच्छ। सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु। पुत्रौ वातायनात् पश्यतां व्याघ्रम्।

पंचमी

	(पुँ०)		(स्त्री०)	
एक०	तस्माद्,	विष्टरात्।	तस्याः,	पाठशालायाः।
द्वि०	ताभ्याम्,	× ।	ताभ्याम्,	× ।
बहु०	तेभ्यः,	× ।	ताभ्यः,	× ।

(न०)

एक०	यस्मात्, गृहात् ।
द्वि०	याभ्याम्, आसनाभ्याम् ।
बहु०	येभ्यः, × ।

पञ्चमी षष्ठी च

(त्रिलिङ्गयोः)

एक०	त्वत् । मत् ।	तव, ते । मम, मे ।
द्वि०	युवाभ्यां । आवाभ्याम् ।	युवयोः वाम् । आवयोः, नौ ।
ब०	युष्मत् । अस्मत् ।	युष्माकं, वः । अस्माकं, नः ।

प्रवर्त्तनाक्रिया

	प्रथमः पुरुषः	मध्यमः पुरुषः	उत्तमः पुरुषः
एक०	तिष्ठतु	पिब	गच्छानि
द्वि०	पश्यताम्	×	×
बहु०	भवन्तु	भ्रमत	व्याहराम

अन्या प्रवर्त्तनाक्रिया

	प्र० पु०	म० पु०	उ० पु०
एक०	लभताम्	लभस्व	लभै
द्वि०	लभेताम्	लभेथाम्	लभावहै
बहु०	लभन्ताम्	लभध्वम्	लभामहै

षष्ठः प्रपाठकः ।


अद्योत्सवे मम गृहं ग्रामादायान्तु बान्धवाः ।
तान् वन्दे स्वागतं तेभ्यः सौहृदाद् व्याहराम च ॥
अश्वात् स एव पतति यश्चाश्वमधिरोहति ।
योऽश्वाद् भीतः कथं नाम सोऽश्वात् पततु मानुषः ॥
मा प्रमाद्य सदाचाराद् वत्स ! मा विरमोद्यमात् ।
जगदीशप्रसादात्ते फलिष्यति मनोरथः ॥
प्राणाघाताद् निवर्त्तध्वं त्रायध्वं संकटात् परान् ।
पराजयध्वं मा दुःखाद् भयं कस्माद् भविष्यति ॥
परापवादाद् वचनं चित्तं चानिष्टचिन्तनात् ।
शरीरं परपीडातो निवारय निवारय ॥
सत्कुलाज्जायतां कोऽपि लभतां वा धनं सुखात् ।
विना गुरोरध्ययनान्मूर्खसंज्ञा न नश्यति ॥
परीक्षायामनुत्तीर्णो लज्जते छात्रमण्डलात् ।
वातायनात् प्रेक्षतेऽन्यान् बान्धवेभ्यो निलीयते ॥
विद्यालयान्मम गृहं पञ्च क्रोशास्तथाप्यहम् ।
सर्वेभ्यः पूर्वमायामि तेभ्यः पश्चाद् व्रजामि च ॥

बाल्यात्प्रभृति शिक्षस्व शौचाचारान् दिनाद् दिनम् ।
प्ररूढयौवनादूर्ध्वं योऽसि सोऽसि त्व मा क्षयात् ॥
सूर्योदयात् प्राग् उत्तिष्ठ धर्मादन्यन्न चिन्तय ।
शिक्षस्व विद्यामाचार्याद् असत्यात्सत्यमुद्धर ॥

बान्धवा ग्रामात् कदा आयान्ति ? आगतान् बान्धवान् प्रति किं करिष्यसि ? तेभ्यः कः स्वागतं व्याहरिष्यति ? त्वं कान् वन्दसे ? कः अश्वात् पतति ? को वा न पतति ? त्वं कस्माद् भीतः असि ? यः सदाचारात् प्रमाद्यति तस्य का हानिर्भवति ? किं त्वम् उद्यमाद् विरमसि ? यः प्राणाघातात् निवर्त्तते परान् संकटात् त्रायते दुःखाच्च न पराजयते स कस्माद् भीतो भवति ? परानिष्टचिन्तनात् किमिति चित्तं न निवारयसि ? मूर्खसंज्ञा केन उपायेन नश्यति ? यः परीक्षायाम् अनुत्तीर्णः भवति स किं किम् आचरति ? नगरात् कति क्रोशाः तव ग्रामः ? यः सर्वेभ्यः पूर्वं विद्यालयमागच्छति सर्वेभ्यः परं च गच्छति स किं फलं लभते ? यौवनात् ऊर्ध्वं त्वं यः भवसि स एव भवसि आमरणात्, अथवा परिवर्त्तसे ?

पर्वतात् जलं प्रपतति । संपतन्ति ।
सभायां जनाः सर्वतः अश्ववारो[1] हरिणमनुपतति ।

१. cf. सवार ।



पर्वतात् जलं प्रपतति

निष्पतन्ति नीडेभ्यः[1] खगाः।
यद्‌यद् आपतति[2] तत्सर्वं सहस्व ।
वृक्षाद् वृक्षम् उत्पतति कपोतः ।
स प्रातरेव गृहाद् देशान्तरं प्रतिष्ठते ।
यः स्वधर्ममनुतिष्ठति स सुखं लभते ।

शिवः कैलाशमधितिष्ठति।
अध्यापको वेत्रासनमधितिष्ठति ।
तस्माद् ग्रामात् किम् उत्तिष्ठति[3] ।
शयनाद् उत्तिष्ठामि ।
छात्रः समये उपतिष्ठते।
भक्तः सूर्यम् उपतिष्ठते।

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति? दशरथस्य पुत्रो दाशरथिः । गङ्गायाः पुत्रो गाङ्गेयः । मम पुस्तकं मामकम्, तव पुस्तकं तावकम्; किन्तर्हि मदीयं पुस्तकं त्वदीयं कथयसि ? समुद्रस्य जलं क्षारम्[4] कूपस्य च मधुरम् । यदि रामस्य धनं श्यामः चोरयेत् तर्हि नृपः तं दण्डयेत्। यो दुर्जनानां संसर्गं परिहरेत् स सुखं लभेत ।

---

१. cf. nest. २. cf. आपड़ना । ३. cf. उठना । ४. cf. खारा ।

सप्तमी

(त्रिलिङ्गयोः)

एक०	त्वयि	मयि
द्वि०	युवयोः	आवयोः
ब०	युष्मासु	अस्मासु

षष्ठी

	(पुँ०)	(स्त्री०)	(न०)
एक०	तस्य, दशरथस्य ।	तस्याः, गङ्गायाः ।	तस्य, शरीरस्य ।
द्वि०	तयोः, पिककाकयोः ।	तयोः, × ।	तयोः, × ।
ब०	तेषाम्, धावमानानाम् ।	तासाम्, × ।	तेषाम्, निजगात्राणाम् ।

सप्तमी

	(पुँ०)	(स्त्री०)	(न०)
एक०	तस्मिन्, फाल्गुने ।	तस्यां, छायायाम् ।	तस्मिन्, हरिद्वारे ।
द्वि०	तयः:, × ।	तयोः, × ।	तयोः, × ।
ब०	तेषु, अरिषु ।	तासु, हेमन्तग्रीष्मवर्षासु ।	तेषु, तृणेषु ।

विधिक्रिया

	प्रथमः पुरुषः	मध्यमः पुरुषः	उत्तमःपुरुषः
एक०	चोरयेत्	परित्यजेः	गायेयम्
द्वि०	कर्षेताम्	×	×
ब०	तिष्ठेयुः	×	×

अन्या विधिक्रिया

	प्र० पु०	म० पु०	उ० पु०
एक०	लभेत	लभेथाः	लभेय
द्वि०	लभेयाताम्	लभेयाथाम्	लभेवहि
ब०	लभेरन्	लभेध्वम्	लभेमहि

सप्तमः प्रपाठकः

तवोज्ज्वलानि रत्नानि मम काणाः[1] कपर्दकाः[2] ।
धनिकस्त्वं दरिद्रोऽहं भवेत् सख्यं किमावयोः ॥
अध्यापनं गुरोर्धर्मः शिष्यस्याध्ययनं तथा ।
द्वयोरेकोऽपि हीनश्चेल्लभेयातां न सत्फलम् ॥
सैनिकानां सहस्राणि शतघ्नीनां शतानि वा ।
न क्षमेरन् वशीकर्त्तुं विरक्ता व्यथिताः प्रजाः ॥

---

१. cf. कानी । २. cf. कौड़ी ।

वृषभाणां तु सर्वेषां धौरेयौ धवलौ मम ।
कर्षेताम् सकलां पृथ्वीं किं तावत् क्षेत्रमल्पकम् ॥
अश्वानां धावमानानां योऽयं श्वेतोऽवलोक्यते ।
स हि सर्वानतिक्रामेदिति संभावयाम्यहम् ॥
तिष्ठन्ति य इमे छात्राः सर्वे पुस्तकपाणयः ।
तेषां मध्ये पटुतमो यस्तमध्यापयेद् भवान् ॥
अद्य संवत्सरः पूर्णः स्वर्गतस्य महाकवेः ।
कामो मे छात्रवर्गेण गायेयं काव्यमुत्तमम् ॥
कीर्तिः कस्य प्रिया नास्ति कायः कस्य न वल्लभः ।
तदेकेन प्रियेणान्यां प्रियां रक्षेद् बुधः सदा ॥
शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं त्वरितं नश्येत् तिष्ठेयुः सततं गुणाः ॥
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
पिकः काकाद् न भिद्येत न वदेन्मधुरं यदि ॥
गन्तव्यस्तव सन्मार्गः क्षन्तव्या रिपवोऽपि ते ।
सेव्यो गुरुजनो भक्त्या स्मरणीयो हरिस्त्वया ॥
धनस्य हेतोः पुरुष ! स्वधर्मं न परित्यजेः ।
गुणानामेव तृप्तः स्या दोषाणामपहारकः ॥

---

१. cf. धौरा । २. cf. तुरत ।

पादपानामधः केचिद् गृहहीनाः कुटुम्बिनः ।
हेमन्तग्रीष्मवर्षासु भूमेरुपरि शेरते ॥
ग्रामस्य निकटे वापी वाप्या दक्षिणतः कुटी ।
कुट्या अदूरतो निम्बस्तस्मिन् वसति मे शुकः ॥
अप्रभुर्निजगात्राणामज्ञो गहनपद्धतेः ।
रामः स्मरति सीतायाः शतकृत्वो दिनस्य सः ॥
रामस्य सदृशः पुत्रो भरतस्य समोऽनुजः ।
सीतायाः सदृशी भार्या त्रयमेकत्र दुर्लभम् ॥

यस्य उज्ज्वलानि रत्नानि भवन्ति स कः? यस्य काणाः कपर्दकाः स च कः? किं तयोः मित्रता भवितुमर्हति? यदि गुरुः शिष्यश्च स्वधर्मं न पालयेताम् तर्हि किं भवेत्? नृपः प्रजाः वशीकर्त्तुं कथं क्षमेत? किं शस्त्रैः? आहोस्वित् सम्यक् पालनेन? धवलौ वृषभौ किं कुर्याताम्? किं तौ अल्पकं क्षेत्रं कर्षेतां न वा? श्वेतस्य अश्वस्य विषये त्वं किं संभावयसि? अध्यापकः पटुतमं छात्रं कस्य हेतोः अध्यापयति? यस्य महाकवेः काव्यं छात्रवर्गेण सह गातुं तव कामः स कुत्र विद्यते? किं तव कीर्तिः प्रिया कायो वा प्रियः? उभौ प्रियौ चेत् किं प्रियतरम्? काकः पिकात् केन गुणेन भिन्नः? सन्मार्गः केन गन्तव्यः केन

1. cf नीम ।

वा शत्रवः हन्तव्याः ? कीदृशाः कुटुम्बिनः सर्वेषु ऋतुषु कुत्र संविशन्ति ? तव शुकः कुत्र वसति ? कीदृशो रामः सीतायाः दिनस्य शतकृत्वः स्मरति ? केन सदृशः पुत्रः, केन समोऽनुजः, कस्या वा सदृशी भार्या दुर्लभा ?

तैलबिन्दुर्जले प्रसरति ।
न मे हस्तपादं प्रसरति ।
फाल्गुने गृहे गृहे उत्सवः प्रसरति ।
अग्निः शुष्केषु तृणेषु त्वरितं प्रसरति ।
सर्पविषं शरीरे यथा यथा प्रसरति तथा तथा जीवो मूर्च्छति ।
नृपः संपतति, तद् दूरम् अपसर ।
अपसरति मेषः प्रहाराय ।
अभ्यासमनुसरति विद्या
छाया नरमनुसरति ।
स्वधर्ममनुसर ।
रात्रौ गृहान्न निःसरन्ति बालाः ।
बिलात् जलं शनैः शनैर्निःसरति ।

पुरा गुरुकुले वर्त्तमानाश्छात्रा ब्राह्मे मुहूर्त्ते बुद्ध्वा वेदान् अपठन् । रघुकुलीनाः शैशवे विद्यामभ्यस्यन्, यौवने विषयानैच्छन् वार्द्धके मुनिवद् अवर्त्तन्त, अन्ते च योगेन तनुमत्यजन् । ग्रामे भवो ग्राम्यः, अरण्ये भव आरण्यः। रामराज्ये ग्राम्या आरण्याश्च जीवाः सुखमवसन् । लङ्कायामेव रामो

१. cf. पसरना = फैलना ।

रावणमजयत् । हरिद्वारे यादृशं गङ्गाया जलमपिबम्, न तादृशमत्र पाटलिपुत्रे । कन्ये छायायामुपाविशताम् । वृद्धत्वे संसारस्यासारतामबोधः। वने महिषानपश्यन् । रथं समराङ्गणमनयाम । युवामरिषु शरानक्षिपतम् । कथं यूयमध्ययने मतिं नाकुरुत ? अयोध्यायामवसाव ।

भूतकालिकी क्रिया

	प्रथ० पुरु०	मध्य० पुरु०	उत्त० पुरु०
ए०	अजयत्	अबोधः	अपिबम्
द्वि०	उपाविशताम्	अक्षिपतम्	अवसाव
ब०	अपश्यन्	अकुरुत	अनयाम

अन्या भूतकालिकी क्रिया

	प्र० पुरु०	मध्य० पुरु०	उ० पुरु०
ए०	अवर्त्तत	अवर्त्तथाः	अवर्त्ते
द्वि०	अवर्त्तेताम्	अवर्त्तेथाम्	अवर्त्तावहि
ब०	अवर्त्तन्त	अवर्त्तध्वम्	अवर्त्तामहि

अष्टमः प्रपाठकः ।

मंसीधान्यां मसीं रच्च करे कुरु च लेखनीम् ।
निषीद स्वासने वत्स ! लिख वर्णान् सुशोभनान् ॥
भाद्रे कृष्णेऽष्टमीतिथ्यां निशीथे घोरदुर्दिने ।
देवक्यजनयत् कृष्णं कंसकारागृहान्तरे ॥
मैत्रः सुखान्विते रामः करुणो दुःखपीडिते ।
परोपकारे निरतः स्निग्धः सर्वेषु बन्धुषु ॥ (आसीदिति शेषः)
ब्रह्मचर्याग्निदीप्तेषु च्छात्रेषु सकलेष्वपि ।
आरुणिः केवलं सेवाधर्मेण प्रथितोऽभवत् ॥
न प्रचण्डे न वा जैत्रे न कोषबलगर्विते ।
प्रजा नृपेऽनुरज्यन्ति पितृवत् पालके यथा ॥
विनयेन गुरौ रामो नयेन निजबन्धुषु ।
सौजन्येन च सर्वेषु प्रजावर्गेष्ववर्त्तत ॥
स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः ।
पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
सहस्रगुणमाचार्ये श्रोत्रिये दत्तमक्षयम् ॥
उपपन्नमिदं रामे युक्तरूपं च लक्ष्मणे ।
यत्तौ गुरोर्वसिष्ठस्य शासनेऽतिष्ठतां सदा ॥

---

१. cf. मसिआनी (मैथिली) । २. cf. Pigmy. ३. cf. So-called.

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥

न प्राहरन्नुत्तमाङ्गे नागृह्णन् कर्णयोरपि ।
जितक्रोधाः पुराचार्याः शिष्यानप्रियकारिणः ॥

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः खलु कथ्यते ॥

न जनन्यां न दारेषु न सोदर्ये न वा सुते ।
विश्वासस्तादृशः पुंसां यादृङ् मित्रे स्वभावजे ॥

लेखनसमये किं किं करोति जनः ? शोभनान् वर्णान् लेखितुं किं किमुपादानमपेक्षसे ? देवकी कृष्णं कुत्र कदाऽजनयत् ? रामः कुत्र स्निग्धः कस्मिन् वा करुण आसीत् ? आरुणिः कथं जलरोधे समर्थोऽभवत् ? किमिदानीमिव तदानीमपि तथाकुर्वन्तं तमारुणिं रोगो वा व्याधिर्वा नारुजत् ? कीदृशे नृपे प्रजा अनुरज्यन्ति कीदृशाय च द्रुह्यन्ति ? रामः कस्मिन् कस्मिन् कथं कथम् अवर्त्तत ? एडः स यः कर्णाभ्यां न शृणोति, तस्मिन् अर्थे यथा बधिरशब्दो वर्त्तते तथा अल्पतनौ पुरुषे कः शब्दो वर्त्तते ?

यथा पङ्गुः श्रोणः कथ्यते कुकरश्च कुणिः, तथा लोचनाभ्यां विहीनः किं कथ्यते? यः पृष्टः सन् आत्मानं ब्राह्मणं ब्रूते न ब्राह्मणवद् आचरति स ब्राह्मणब्रुवः, तस्मै दत्तं दानं किंफलं भवति किं च आचार्याय दत्तम्? रामलक्ष्मणौ गुरोः शासने कथमतिष्ठताम्? किमेतत तयोः शोभनम् अशोभनं वा? तूलराशौ पतितोऽग्निः किं करोति? मृगशरीरे पतितो बाणः कथं तेन तुल्यः? अद्यत्वे कश्चिद् अध्यापकः शिष्यं शीर्षे प्रहरति कश्चिद् वा कर्णे गृह्णाति? पुरातना आचार्याः किमकुर्वन्? यथा अकुर्वन् तथा करणे को हेतुः? कः साधुः को वाऽसाधुः कश्च द्वाभ्यां भिन्नः? पुरुषाणां कुत्र कीदृशो विश्वासो भवति?

पुरोहितो होमाय अग्निं प्रणयति।
भवभूतिरुत्तररामचरितं प्राणयत् (प्र+अनयत्)।
स एव गुरुर्यः शिष्याणां संशयमपनयति।
अविनयमपनय विष्णो!

योधाः सेनापतेः शरीरात् शल्यानि अपानयन्।
भीतमाश्वासयेत् प्राज्ञः क्रुद्धं चानुनयेत् सदा।
राजा विवदमानयोर्व्यवहारं निरणयत् (निर्+अनयत्) गुरवो गुरुप्रियं कुमारं व्यन-

यन् (वि + अनयन्)।	अशृण्वन् अपि कथं
मधुराणि फलान्यानय।	श्रुतिमभिनयसि ?
तस्य चेष्टया मनोगतम्	इतः पञ्चमे अहनि (दिने)
उन्नयामि।	वरः कन्यां परिणे-
अहृष्टोऽपि हर्षमभि-	ष्यति।
नयति धूर्त्तः।	रामः सीतां पर्यणयत्।

पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा ! उदिते चन्द्रमसि किं दीपिकाप्रवर्त्तनेन ! अथ तस्माद् अरण्यात् परित्यज्य गते लक्ष्मणे सीतादेव्याः किं वृत्तमित्यस्ति काचित् प्रवृत्तिः ?

जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥
कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।
सूर्ये तपत्यन्धकारः कथमाविर्भविष्यति॥

विलपन्त्यां मातरि पुत्रः कारागृहं व्रजति। निषेधतोऽपि शासितुः प्रजा राजनियमान् अतिलङ्घन्ते। तस्य पश्यत एव चौरः सर्वस्वमहरत्। मिषतामेव राक्षसानां हनूमान् लङ्कामदहत्। प्रविष्टमात्र एव सभापतौ सभ्या आसनेभ्य उदतिष्ठन्।

असमाप्तवचन एव मयि किमिति मध्ये मध्ये व्याक्षिपसि ? क एष दुर्विनीतः समुपस्थितेऽपि कुलपतौ गुरुकुले अविनयमाचरति ।

संबोधनम्

	पुँ०	स्त्री०	न०
ए०	वत्स !	देवि !	×
द्वि०	×	×	×
ब०	×	×	×

नवमः प्रपाठकः ।

अनुभूय बहून् क्लेशान् अर्जितो धनसञ्चयः ।
पात्रेषु विद्यमानेषु किमपात्राय दीयते ?
वन्द्यसे पूज्यसे देवि ! जन्मभूमे ! निजैः सुतैः ।
तिष्ठत्सु तेषु नैराश्यात् किमर्थमवसीदसि ?
अग्निना दह्यते काष्ठं चिन्तया दह्यते तनुः ।
विनाऽग्निना विना चिन्तामीर्ष्यया दह्यते खलः ॥
प्रबुद्धस्यापि पद्मस्य मुषित्वा सर्वसौरभम् ।
प्रकाशमेष आगच्छन् पवनः कैर्न सेव्यते !

अस्माभिः स्थीयतेऽत्रैव श्रूयते मधुरो ध्वनिः ।
गम्यतां भवता तत्र यत्र बालैः प्ररुद्यते ॥

यदि क्रियेत कर्त्तव्यं त्यज्येरन् व्यसनानि च ।
पीड्येमहि न दैवेन दृश्येरन् दिवसाः शुभाः ॥

भद्राणि कर्णैः श्रूयन्तां प्रेक्ष्यन्तां नयनोत्सवाः ।
स्वाद्यन्तां रुचिरान्नानि जीव्यतां वत्सरान् शतम् ॥

अपच्यतौदनः सूदैः क्षिप्रं छात्त्रैरभुज्यत ।
भुक्त्वा नीत्वा पुस्तकानि पाठशालाऽप्यगम्यत ॥

अकृत्वा परसंतापमगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां मार्गं यत्स्वल्पमपि तद्बहु ॥

सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ।
स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥

गन्तुमैच्छमहं तत्र द्रष्टुं दृश्यान्यनेकशः ।
किन्तु क्रुद्धेन तातेन नानुज्ञातोऽस्मि साम्प्रतम् ॥

पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह ॥

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते ।
भिन्नश्लिष्टा तु या प्रीतिः सा दुःखैकप्रदायिनी ॥

नवे वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद् वाचं मनःपूतं समाचरेत् ॥
अग्नौ दग्धं जले मग्नं हृतं तस्कर-पार्थिवैः ।
तत्सर्वं दानतुल्यं स्याद् यदि स्वामी न शोचति ॥
असंभाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते ।
शिला तरति पानीयं गीतं गायति वानरः ॥
तावद् भयाच्च भेतव्यं यावद् भयमनागतम् ।
आगतं तु भयं वीक्ष्य प्रहर्त्तव्यमभीतवत् ॥
मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः ।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥

———

पात्रं विहाय यदि अपात्राय दीयेत ततः किं भवेत् ? अद्यत्वे दातारः स्वोपार्जितं धनं मूर्खेषु वितरन्ति तत्किं समीचीनम् ? यस्याः सुताः वन्दन्ते पूजयन्ति च सा जन्मभूमिः किं दुःखं लभते ? किं तावत् खलं दहति ? चिन्ता अग्निर्वा ? चोरः सुप्तस्य धनं हरति जागरितस्य वा ? यश्चौरः जागरितस्य धनं हृत्वा भयात् न निलीयते प्रत्युत प्रकाशं क्राम्यति स धृष्टो भवति, एतादृशश्चोरो

वन्दनीयो दण्डनीयो वेति निर्णेतुं किं शक्यसि ? जनो यत्र मधुरध्वनिं शृणोति तत्र तिष्ठति, अन्यत्र वा गच्छति यत्र बालाः क्रन्दन्ति ? केन उपायेन सुदिवसो दृष्टिपथम् आगच्छति ? शतं वत्सरान् कः सुखं जीवति ? सूदाः (सूपकाराः[१]) यमोदनमपचन् तं केऽखादन् ? खादित्वा च किमकुर्वन् ? परान् असंताप्य खलस्य पुरस्तात् अनम्रीभूय सज्जानानां मार्गमपरित्यज्य यद् अर्जितं भवति तत् किं तुभ्यं रोचते तस्माद् विपरीतं वा ? दुर्गायाश्चरितं स्मरन् नरः किं फलं लभते ?

तव तातो दृश्यानि कथं द्रष्टुं नानुजानाति ? जनः केन सह गच्छेत् केन केन वा वदेत् ? कीदृशी प्रीतिर्दुःखकरी कीदृशी वा सुखकरी ? कस्य शरीरधातवः क्षीयन्ते ? तरुणस्य वृद्धस्य वा ? कस्य शमः शोभते ? मार्गे कथं व्रजेत् ? कीदृशं जलं पिबेत् ? वाक् केन पूता भवति केन वा अपवित्रा ? स्वामी यदि नष्टं धनं न शोचति तर्हि तत् केन तुल्यं कथं भवति ? लोकः प्रायेण अद्भुतप्रियो भवति, अतः सः असंभाव्यमपि वदति; किं तथा करणं समीचीनम् ? भयात् कियच्चिरं भेतव्यम् कदा च न भेतव्यम् ? पण्डितान् के द्विषन्ति ?

---

१. cf. सुआर ।

धूर्त्तो वटुर्मस्तकपीडामपदिश्य पाठशालां न गच्छति ।

परीक्षायामनुत्तीर्णो भाग्यमपदिशति ।

रामः सीतायै संदिशति ।

त्वं गृहाय दूतं संदिश ।

अध्यापको मानचित्रम् अङ्गुल्या निर्दिशति ।

आगन्तुकाय देवदत्तस्य गृहं निर्दिशामि ।

मां गृहगमनायाऽऽदिशति ।

स्वामी भृत्यमादिशति ।

किमुद्दिश्य त्वमत्रागतः ?

किं फलमुद्दिशसि कर्मणाऽनेन ?

उपदिशति गुरुः शिष्यम् ।

क्रियते दुःखेन सुखमुपदिश्यते परस्य ।

तुभ्यं ज्ञानमुपदिशामि ।

त्वं तस्य प्रार्थनां प्रत्यादिशसि ।

दुष्यन्तः शकुन्तलां प्रत्यादिशत् ।

स मामुपदिशति, अहं तं प्रत्युपदिशामि ।

कर्त्तरि वाच्ये	कर्मणि वाच्ये
(सः) पात्राय धनं ददाति ।	(तेन) पात्राय धनं दीयते ।
निजाः सुता जन्मभूमिं (त्वां) वन्दन्ते पूजयन्ति ।	निजैः सुतैर्वन्द्यसे पूज्यसे (त्वम्)
अग्निः काष्ठं दहति ।	अग्निना काष्ठं दह्यते ।
चिन्ता तनुं दहति ।	चिन्तया दह्यते तनुः ।

पवनं के न सेवन्ते ?	पवनः कैर्न सेव्यते ?
वयं मधुरं ध्वनिं शृणुमः ।	अस्माभिः श्रूयते मधुरो ध्वनिः ।
यदि (जनः) कर्तव्यं कुर्यात्।	यदि (जनेन) क्रियेत कर्त्तव्यम् ।
यदि (जनः) व्यसनानि त्यजेत् ।	यदि (जनेन) व्यसनानि त्यज्येरन् ।
यदि दैवम् (अस्मान्) न पीडयेत् ।	यदि दैवेन (वयं) न पीड्येमहि ।
(वयं) शुभान् दिवसान् पश्येम ।	(अस्माभिः) दृश्येरन् दिवसाः शुभाः ।
(जनाः) भद्राणि शृण्वन्तु ।	(जनैः) भद्राणि श्रूयन्ताम् ।
(,,) नयनोत्सवान् प्रेक्षन्ताम् ।	(,,) प्रेक्ष्यन्तां नयनोत्सवाः ।
(जनाः) रुचिरान्नानि स्वादयन्तु ।	(,,) रुचिरान्नानि स्वाद्यन्ताम् ।
सूदा ओदनम् अपचन् ।	अपच्यतौदनः सूदैः
छात्राः ,, अभुञ्जत ।	(ओदनः) छात्रैरभुज्यत ।
,, पाठशालामगच्छन् ।	पाठशाला छात्रैरगम्यत ।

भावे वाच्ये

(अकर्मका धातवः)

वयं तिष्ठामः ।	अस्माभिः स्थीयते ।
भवान् गच्छतु ।	भवता गम्यताम् ।
बालाः प्ररुदन्ति ।	बालैः प्ररुद्यते ।
(जनाः) शतं वत्सरान् जीवन्तु ।	(जनैः) शतं वत्सरान् जीव्यताम् ।

कर्मकर्त्तरि वाच्ये

(शिशिरः) सस्यानि पचति । सस्यानि स्वयमेव पच्यन्ते

पूर्वकालिकी क्रिया

१ पूर्वं बहून् क्लेशान् अनुभवति पश्चात् अर्जयति ।	१ बहून् क्लेशान् अनुभूय अर्जयति ।
२ पूर्वं सर्वसौरभं मुष्णाति पश्चात् आगच्छति	२ सर्वसौरभं मुषित्वाऽऽगच्छति ।
३ पूर्वम् ओदनम् अभुञ्जत पश्चात् पुस्तकानि अनयन्	३ ओदनं भुक्त्वा पुस्तकान्यनयन् ।
४ पूर्वं पुस्तकानि अनयन् पश्चात् पाठशालामगच्छन्	४ पुस्तकानि नीत्वा पाठशालामगच्छन् ।

५ पूर्वं परसन्तापं न करोति, खलनम्रतां न गच्छति। सतां मार्गं न उत्सृजति; पश्चात् स्वल्पं (लभते)	५ परसन्तापमकृत्वा खलनम्रतामगत्वा सतां मार्गमनुत्सृज्य स्वल्पं (लभते)
६ पूर्वम् आगतं भयं वीक्षते पश्चात् प्रहरति	६ आगतं भयं वीक्ष्य प्रहरति

भविष्यत्कालिकी निमित्तक्रिया

'गमिष्यामि' (इत्यर्थम्) अहम् ऐच्छम्	गन्तुम् अहमैच्छम्
'द्रक्ष्यामि' (इत्यर्थम्) अहम् ऐच्छम्	द्रष्टुम् „ „

अर्हार्था कृदन्तक्रिया

(जनः) पञ्चभिः सह गन्तुम् अर्हति	(जनेन)पञ्चभिः सह गन्तव्यम्
(जनः) पञ्चभिः सह स्थातुम् अर्हति	(„) „ „ स्थातव्यम्
(जनः) पञ्चभिः सह वक्तुम् अर्हति	(„) „ „ वक्तव्यम्
(जनः) भेतुम् अर्हति।	(„) भेतव्यम्।
जनः प्रहर्तुमर्हति	जनेन प्रहर्त्तव्यम्

वर्तमानकृदन्तशब्दाः

(पुं०)	(स्त्री०)	(न०)
सुताः तिष्ठन्तः।	माता विलपन्ती।	पात्राणि विद्यमानानि

आगच्छन् पवनः

स्मरन् नरः

अशृण्वन् (त्वम्)

तातपादाः जीवन्तः

सूर्यः तपन्

मिषन्तः राक्षसाः

चिन्त्यमानाः वयम्

भावलक्षणसप्तमी

पत्तने विद्यमाने (यदा पत्तनं विद्यमानमस्ति तदा)

उदिते चन्द्रमसि (यदा चन्द्रमा उदितोऽस्ति तदा)

तातपादेषु जीवत्सु (यदा तातपादा जीवन्त-आसन् तदा)

सूर्ये तपति (यदा सूर्यस्तपन्नस्ति तदा)

पात्रेषु विद्यमानेषु (यदा पात्राणि विद्यमा-नानि सन्ति तदा)



कोकिलः कूजति

अनादरार्थिका षष्ठी सप्तमी च

विलपन्त्यां मातरि	(विलपन्तीं मातरमनादृत्य)
निषेधतः शासितुः	(निषेधन्तं शासितारमनादृत्य)
पश्यतः तस्य	(पश्यन्तं तमनादृत्य)
मिषतां राक्षसानाम्	(मिषतो राक्षसान् अनादृत्य)

दशमः प्रपाठकः

षड् ऋतवः

वसन्तः प्रादुर्भवति। वृक्षाः कुसुमिता भवन्ति। कोकिलः कूजति। भ्रमरा भ्रमन्ति गुञ्जन्ति च। मधुपा मधु पिबन्ति। उपवनानि शोभन्ते। जनो मोदते। एवं चैत्रवैशाखौ व्यतीतौ।

अथ ग्रीष्मः प्रादुर्भवति। सूर्यो भृशं तपति। जलं शुष्यति। दिनानि वर्धन्ते। जनो म्लायति। ज्येष्ठाषाढौ व्यतीतौ।

अथ वर्षाकालः प्रादुर्भवति। मेघा दृश्यन्ते। देवो वर्षति। पर्वताः शीतला भवन्ति। नदीरयो वर्धते। पूर्वानिलो वहति। भूमिः श्यामायते। कृषीवला मोदन्ते। श्रावणो भाद्रपदश्च गच्छतः।


अथ शरत्कालः प्रादुर्भवति। आकाशं निर्मलं जायते। मेघा अपगच्छन्ति। चन्द्रः सम्यक् प्रकाशते। मार्गाः कर्दमरहिता भवन्ति। एवमाश्विनकार्तिकौ व्यतीतौ।

अथ हेमन्तः प्रादुर्भवति। दिवसा ह्रसन्ते। रात्रिर्वर्धते। सूर्यो मन्दं तपति। हिमं पतति। सलिलं शीतलतरं भवति। शीतलः पवनो वाति। एवं मार्गशीर्षपौषौ गच्छतः।

अथ शिशिरः प्रादुर्भवति। दिनानि वर्धन्ते। वृक्षपर्णानि पतन्ति। सस्यानि पच्यन्ते। एवं माघफाल्गुनावपि विगतौ।

दिनमथ रजनी सायं प्रातः,
शिशिरवसन्तौ पुनरायातः।
कालो निगिलति जीवितरत्नं,
तदपि न लोकः कुरुते यत्नम्।
कुरु कुरु कर्म विरम मा तावत्,
सविता सुवति कर्मणे यावत्॥

कतीनां मासानामेक ऋतुर्भवति? श्रावणो भाद्रपदश्च कम् ऋतुं कुरुतः? हेमन्ते किं किं भवति? तस्मिन् ऋतौ सूर्यः कथं तपति कथं च ग्रीष्मे? त्वं ग्रीष्मे कीदृशं



परं तस्य विमाता कैकेयी स्वपुत्राय भरताय राज्यं दत्वा वनाय व्यसृजत्

जलं वाञ्छसि ? हेमन्ते कूपात् कीदृशं जलं निःसरति ? ईश्वरः जनान् कस्मै प्रयोजनाय प्रेरयति ? यः कर्मभ्यो विरमति स किं सवितुः आदेशं पालयति ? त्वया कथं तस्य आदेशः पालनीयः ?

एकादशः प्रपाठकः

भरतस्य त्यागः

कोशलराजस्य दशरथस्याऽयोध्या राजधान्यासीत्। रामः, लक्ष्मणः, भरतः, शत्रुघ्न इति तस्य चत्वारः पुत्रा आसन्। तेषां ज्येष्ठो रामो धार्मिकः, सत्यनिष्ठः, शूरश्चाभवत्। स सुन्दरीं राजकन्यां सीतां पर्यणयत्। राजा तं यौवराज्येऽभिषेक्तुमैच्छत्। परं तस्य विमाता कैकेयी स्वपुत्राय भरताय राज्यं दत्त्वा तं वनाय व्यसृजत्। रामः सीतया लक्ष्मणेन च सह चतुर्दश वर्षाणि वनमध्यवसत्। भरतस्तु स्वयं राज्यमकृत्वा तावन्ति वर्षाणि रामस्य प्रत्यावर्त्तनं प्रतीक्षमाणः प्रजा अवैक्षत। अथ निवृत्ताय रामाय न्यासमिव शासनं प्रत्यर्प्य सर्वभावेन तमसेवत।

भरतेन समो धीरो
भरतस्य समोऽनुजः ।
भरतेन समस्त्यागी
न भूतो न भविष्यति ॥

अयोध्याधिपतेर्दशरथस्य कति पुत्रा आसन्? ज्येष्ठः कथं विमातुर्वचनममन्यत ? राजा कथं रामाय यौवराज्यं दातुमयतत न पुनर्भरताय ? भरतः किं स्वयमुपस्थितं राज्यं नागृह्णात् ? किमीदृशस्त्यागः श्लाघ्यो भवति निन्दनीयो वा ? भरतस्य के के गुणा आसन् ?

(संख्या शब्दाः)	(संख्येयशब्दाः)
वस्त्राणां विंशतिः ।	एकः पुरुषः ।
ब्राह्मणानां शतम् ।	द्वौ चोरौ ।
सैनिकानां सहस्राणि	त्रयः सर्पाः
शतघ्नीनां शतानि	चत्वारः पुत्राः ।
लक्षं श्लोकानाम् ।	पञ्च भूतानि ।
कोटिर्जीवानाम् ।	षड् ऋतवः ।

द्वादशः प्रपाठकः

कैकेय्या भरतस्य च संवादः

भरतः—मातस्तातः क्व यातः ?
कैकेयी—सुरपतिभवनम्

भरतः—हा ! कुतः ?
कैकेयी—पुत्रशोकात्
भरतः—कोऽसौ पुत्रश्चतुर्णाम् ?
कैकेयी—त्वमवरजतया यस्य जातः
भरतः—किमस्य ?
कैकेयी—प्राप्तोऽसौ काननान्तम्
भरतः—किमिति ?
कैकेयी—नृपगिरा ?
भरतः—किं तथाऽभाषताऽयम्
कैकेयी—मद्वाग्बद्धः
भरतः—फलं ते किमिह ?
कैकेयी—तव धराधीशता
भरतः—हा ! हतोऽस्मि !! (इति मूर्च्छति)

किं केवलं गद्यं जानासि, पद्यमपि वा ? एकस्मिन् पद्ये कति चरणा भवन्ति ? किमेष संवादो गद्यमयः पद्यमयो वा ? अनु जायते = अनुजः, अवरं जायते = अवरजः, अवरजस्य भावः अवरजता; 'त्वं यस्यानुजोऽवरजो वा' इति ऋजुनि वक्तव्ये किमिति "त्वमवरजतया यस्य जातः" इति कुटिलः पदन्यासः ?

त्रयोदशः प्रपाठकः

सिंही शृगालशावकश्च

कस्मिंश्चित् उद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयमजनयत्। सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै प्रयच्छति। अथ अन्यस्मिन्नहनि तेन किमपि सत्त्वं नासादितम्। वने भ्रमतोऽस्य रविरस्तं गतः। अथ तेन स्वगृहम् आगच्छता शृगालशिशुः प्राप्तः। स च बालकोऽयमिति मत्त्वा यत्नेन दंष्ट्रामध्यगतं कृत्वा जीवन्तमेव सिंह्याः समर्पितवान्। ततः सिंहभार्याऽवदत् "भोः कान्त! त्वयानीतं किञ्चित् अस्माकं भोजनम्?" सिंह आह "प्रिये! मया अद्य इमं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वमासादितम्। स च बालोऽयमिति कृत्वा न व्यापादितः। इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभाते अन्यत् किञ्चित् उपार्ज्जयिष्यामि"। सा प्राह। "भोः कान्त! त्वया बालकोऽयं विचिन्त्य न हतः तत् कथमहं स्वोदरार्थे विनाशयामि?" उक्तञ्च

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽप्युपस्थिते।
न च कृत्यं परित्याज्यं धर्म्म एष सनातनः॥

तस्मात् ममायं तृतीयः पुत्रो भविष्यति।"
(इ)त्येवम् उक्त्वा तमपि स्तनक्षीरेण परां पुष्टिम् (अ)नयत्। एवं ते त्रयोऽपि शिशवः परस्परम् अज्ञा(त)जातिविशेषा एकाहारविहारा बाल्यसमयं निर्वाहयन्ति। अथ कदाचित् तत्र वने भ्रमन् आरण्यगजः समायातः तं दृष्ट्वा तौ सिंहसुतौ द्वावपि (क)ुपिताननौ तं प्रति यावत् प्रचलितौ तावत् तेन शृगालसुतेन अभिहितम्, "अहो! गजोऽयं (य)ुष्मत्कुलशत्रुः तन्न गन्तव्यमेतस्याभिमुखम्।" (ए)वमुक्त्वा गृहं प्रधावितः। तावपि ज्येष्ठबान्धव(भ)ङ्गात् निरुत्साहतां गतौ।

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विह(स)न्तौ ज्येष्ठभ्रातृचेष्टितमुदाहरताम्। अथ शृगालः (त)दाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्र(ल)ोचनः भ्रुकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतर(व)चनान्यवदत्। ततः सिंह्या एकान्ते नीत्वा (प्र)बोधितोऽसौ। "वत्स! मैवं कदाचित् जल्प। (भ)वदीयौ लघुभ्रातरावेतौ"। अथासौ प्रभूतकोपावि(ष्ट)स्तां प्रत्यवदत्, "किमहम् एताभ्यां शौर्य्येण, रूपेण, (व)िद्याभ्यासेन, कौशलेन वा हीनो येन मामुपहसतः?

तन्मया अवश्यम् एतौ हन्तव्यौ" तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह ।

"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥

तत् सम्यक् शृणु वत्स ! त्वं शृगालीसुतः कृपया मया स्तनक्षीरेण पुष्टिं नीतः। तद्यावदमू मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीतः। तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये भव। नो चेत् आभ्यां हतो मृत्युमुखं पतिष्यसि"। सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैरपसृत्य स्वजात्या मिलितः ।

सिंहो मृगान् हत्वा किं करोति ? अन्येद्युस्तेन किं प्राप्तम् ? गृहमागच्छन् सिंहः किमलभत ? सिंहः शावकं स्थानात्स्थानान्तरं कथं नयति ? सिंहेन प्राप्तोऽपि जम्बुकशावकः कथं नं मारितः ? सिंही कं सनातनधर्ममनुसृत्य शृगालशिशुं न व्यापादितवती ? शिशवः कथं बाल्यमनयन् ? आरण्यं गजमवलोक्य शृगालः सिंहसुतौ च किमकुर्वन् ? आत्मनः परिहासमाकर्ण्य शृगालः कथं कोपमदर्शयत् ? सिंही शृगालं रहसि नीत्वा किमबोधयत् ? सिंह्या वचनं श्रुत्वा शृगालसुतः कथं पलायितः ?

कर्त्तरि वाच्ये भूतकृदन्त-प्रयोगाः	कर्मणि वाच्ये भूतकृदन्त-प्रयोगाः ।
रविःअस्तं गतः ।	सिंहेन सत्त्वम् आसादितम् ।
सिंहः शिशुं सिंह्यै समर्पितवान् ।	शृगालशिशुर्न व्यापादितः
आरण्यगजः समायातः ।	शृगालसुतः प्रबोधितः ।
गृहं प्रधावितः ।	स्तनक्षीरेण पुष्टिं नीतः ।
शृगालःस्वजात्या मिलितः	आभ्यां हतः ।

चतुर्दशः प्रपाठकः

अचौर्यम्

देशाद्देशं परिभ्रमन् कश्चन यतिः कस्यापि नरपतेरुपवनं प्राविशत् । नरपतिश्च तं विनीतवेशं दीनमुखं चावलोक्य किङ्करोऽयमिति मत्वा "त्वमस्य ममोद्यानस्य पालको भवे" ति तमुद्यानपालं कृत्वा राजकुलं न्यवर्त्तत । अथ स वराको यतिस्तत्रैव निर्जने तमाराममपालयत् ।

अथैकदा त्रिचतुरैर्मित्रैः साकं स एवोपवनाधिपस्तस्मिन्नुद्याने विहारस्पृहया समेत्य तमुद्यानपालकं कानिचिन्मधुराणि रसालफलान्यानये" ति

समादिशत्। यतिश्च नरपतेराज्ञामनुसृत्य कान्यपि फलानि वृक्षादवपात्य तस्य पुरस्तात् उपाहरत्। परं तानि सर्वाण्यपि अम्लान्यासन्। तत आरामाधिपतिः किञ्चिदुपजातरोषस्तमपृच्छत्—किं रे उद्यानपाल! एतावन्ति दिनानि अत्र निवसताऽपि त्वया अम्लानि वा मधुराणि वा फलानि न परिचितानि? यतिश्च तद्वाकर्ण्य किञ्चित् स्मयमान इव प्रत्यवदत्—उद्यानपालनाय तत्रभवता नियुक्तोऽहं न पुनः फलभक्षणाय। अभक्षयित्वा च कथं नु विविच्य जानामि "इमानि मिष्टानि[1], इमानि वा शट्टानि[2]" इति। अथ समुत्पन्नविस्मयो राजा तमपृच्छत्—किं त्वमेतावता कालेनैकमपि फलं नाभक्षयः? व्रती च नेति सविनयमवदत्। ततो भूपतिस्तस्य तेन निश्छद्मना प्रतिवाक्येन तं पुरुषविशेषं मत्त्वाऽवन्दत।

राजा यतिं कथं किंकरमजानात्? उद्यानपालनाय आज्ञप्तो यतिः कथं न प्रत्यादिशत्? यतिर्मिष्टानि शट्टानि वा कथं न परिचितवान्? नृपतेराज्ञां विना फलभक्षणे

---

१. cf. मीठा। २. cf. खट्टा।

का हानिः स्यात्? रोषे प्रतिरोषः कर्त्तव्यः, आहोस्वित् हसितव्यम्? राजा कथं तं पुरुषविशेषम् अमन्यत? यतेः प्रतिवचनं कीदृशमासीत्? कमुपदेशं कथयाऽनया लभसे?

पञ्चदशः प्रपाठकः

यत्नः सर्वफलप्रदः

बोपदेवो नाम कोऽपि च्छात्रः स्वगुरोर्व्याकरण-मधीयानः कथमपि तच्छास्त्रफक्किका नाबोधत्। ततोऽसौ न केवलमध्यापकस्य भर्त्सनाया अपि तु सतीर्थ्यानामुपहासस्य च भाजनमभवत्। अथ गच्छता कालेन यथा यथा स तेषामाक्षेपरूक्षाक्षरैः कदर्थितो विषादमगच्छत् तथा तथा व्याकरणाध्य-यनात् पराजयत।

एवमुपहसितस्तिरस्कृतश्च बोपदेवो नैराश्यात् पाठत्यागाय कृतसंकल्पो निर्विण्णमना एकदा नदी-तटमुपागच्छत्। तत्र स्नातुकामाभिः स्त्रीभिः प्रति-दिनं स्थाप्यमानानां घटानामधस्तात् उत्पन्नान् गर्त्तान् अवलोकमानस्य तस्यैवमभवन्मनसि—अहो!

एभिर्मृद्घटैः पुनः पुनः संस्पर्शमात्रेण यदि कठोरतमोऽपि पाषाणः क्षीयेत ! कथं नाम तर्हि पुनः पुनः परिशीलनेन क्षुण्णक्षोदेन पिष्टपेषणेन च व्याकरणवज्रमपि न विशीर्येत !

तत एवमुत्साहितोऽसौ द्विगुणतरनवीकृतेनात्मप्रत्ययेन व्याकरणमहार्णवं तथा मन्थितुमारभत यथा परिगणितैरेव वत्सरैः पारङ्गतो भूत्वा न केवलमात्मन एव बोधमकरोत् किन्तु परेषां मुग्धानामपि बोधाय मुग्धबोधं नाम व्याकरणं प्राणयत्। तत्साध्विदमुच्यते—

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥

बोपदेवः कथं व्याकरणं नाबोधत् ? व्याकरणमबोधन्तं तं छात्राः किमकुर्वन् ? तैः कदर्थितः स किं निरणयत् ? कया घटनया तस्य मन्दताऽपगता ? गर्त्तानवलोक्य स किमचिन्तयत् ? अन्ते स कीदृशो जातः ? किं त्वमपि व्याकरणाद् भीतोऽसि ? किं बोपदेवं न अनुकरिष्यसि ? खनित्रेण खनन् जनः यथा जलं लभते तथा

छात्रः किं लभते ? कां शिक्षामधिगच्छसि बोपदेव-चरितेन ?

षोडशः प्रपाठकः

भोजस्य दानशीलता

पुरा धाराराज्ये भोजो नाम भूपतिश्चिरं प्रजाः पर्य्यपालयत्। स राजा विद्वत्-प्रियो वदान्यशिरोमणिरिति ख्यातिमगच्छत्। एकदा राजमार्गे विहरन् स कमपि विप्रमपश्यत्। तस्य हस्ते चर्म्ममयं कमण्डलुं दृष्ट्वा तञ्च दरिद्रं ज्ञात्वा राजा आह। "विप्र! चर्म्मपात्रं किमर्थं पाणौ वहसि" इति। स च विप्रो मुखशोभया तं भोजं विचार्य्याह। "देव! दातृणां शिरोमणौ भोजे पृथिवीं शासति लौहस्य च ताम्रस्य चाभावोऽभवत्। तेन चर्म्ममयं पात्रं वहामि" इति। राजाह। "भोजे शासति लौहताम्राभावे को हेतुः"? विप्र आह।

अस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम्।
शत्रूणां शृङ्खलैर्लौहं ताम्रं शासनपत्रकैः॥

ततस्तुष्टो राजा प्रभूतं धनमयच्छत्।

इदानीं धारानगरी केन नाम्ना प्रसिद्धा ? कथं भोजस्य पण्डिताः प्रिया आसन् ? भोजः कां ख्यातिमलभत ? ब्राह्मणः कीदृशं पात्रं करेऽकरोत ? तादृशं पात्रं ब्राह्मणः किं धारयितुमर्हति ? ब्राह्मणो भोजं कथमजानात् ? भोजस्य राज्ये लौहाभावे को हेतुः ? किं ब्राह्मणस्य उत्तरम् यथार्थमयथार्थं वाऽऽसीत् ? अयथार्थमुत्तरं श्रुत्वा भोजः कथमतुष्यत् ?

सप्तदशः प्रपाठकः

नीचाय श्लाघ्यपदं न देयम्

अस्ति गौतमारण्ये महातपा नाम मुनिः । स कदाचित् मूषिकशावकमेकं वायसेन नीयमानमपश्यत् । ततस्तेन कारुणिकेन मुनिना मूषिकः वायसाद् मोचितः नीवारकणैः संवर्धितश्च । अथ कदाचिद् बिडालस्तं मूषकं खादितुमुपाधावत् । तमवलोक्य मूषिको वेपमानो मुनेः क्रोडं प्राविशत् । ततो मुनिनोक्तम् । मूषिक ! त्वं मार्जारो भव इति । अथ स मुनेः प्रभावेण मार्जारोऽभवत् । परं कुक्कुरं दृष्ट्वा पलायते । ततो मुनिनाऽभिहितम् ।

यत् कुक्कुराद् भीतोऽसि तत् त्वमपि कुक्कुरो भव' इति । अथ स मुनेर्वचनसामर्थ्यात् सारमेयोऽभवत् । परं यदा व्याघ्रं दृष्ट्वा पलायितस्तदा स तेन मुनिना व्याघ्रः कृतः ।

पश्चात् तं च मुनिं चैकत्र वीक्ष्य सर्वे जनाः सोपहासं वदन्ति—'अनेनैव मुनिना एष मूषिको व्याघ्रः कृतः' इति । एतत् श्रुत्वा स व्याघ्रोऽचिन्तयत् । यावदयं मुनिर्जीवति तावदिदं मे स्वरूपाख्यानमकीर्त्तिकरं न नश्येत् । इत्यालोच्य मूषिकस्तं मुनिं हन्तुं गतः ।

मुनिस्तस्य मनसि स्थितं ज्ञात्वा 'पुनर्मूषिको भव' इत्युक्त्वा मूषिकमेव कृतवान् ।

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥

मुनिः किमपश्यत् ? मुनिः कीदृश आसीत्? बिडालो मूषकमवलोक्य किं कर्त्तुमैच्छत् ? बिडालात् त्रातुं मुनिः कमुपायमातिष्ठत् ? कुक्कुरः कस्माद् भीत आसीत् ? व्याघ्रः कथं मुनिं हन्तुं प्रवृत्तः ? यदि मुनिर्जीवेत् व्याघ्रस्य का हानिर्भवेत् ? कृतघ्नो व्याघ्रः किं फलमल-

भत ? 'वायसेन' 'कारुणिकेन' 'दृष्ट्वा' 'इच्छति' 'कृतवान्' 'गतः' इत्येषां शब्दानामर्थान् संस्कृते लिखत ।

अष्टादशः प्रपाठकः

बन्धुनुत्पीडयितुं न शत्रुं प्रार्थयेत

गङ्गदत्तः (मण्डूकः) दायादैरुद्वेजितः तेषां विनाशाय कृष्णसर्पस्य बिलद्वारं गत्वा सर्पमाह्वयति ।

गङ्गदत्तः— एहि एहि प्रियदर्शन !

सर्पः (स्वगतम्)–य एष माम् आह्वयति स स्वजातीयो न भवति, नैषा सर्पवाणी; अन्येन केनापि सह मर्त्यलोके मम सन्धानं नास्ति । अतो दुर्गद्वारे स्थितः तावत् अवगच्छामि कोऽयं भवति । यतः ।

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः ।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पतिः ॥

कदाचित् कोऽपि मन्त्रवादी, औषधचतुरो वा माम् आहूय बन्धने क्षिपति, अथवा कश्चित् पुरुषः वैरमाश्रित्य कस्यचित् भक्षणार्थे माम् आह्वयति । (प्रकाशं ब्रूते)—को भवान् ?

गङ्गदत्तः—अहं गङ्गदत्तो नाम मण्डूकाधिपतिः। त्वां मित्रं कर्तुमभ्यागतः।

प्रियदर्शनः (सर्पः) भो अश्रद्धेयम् एतत् वचनम् यत् तृणानां वह्निना सह सङ्गमः। उक्तञ्च।

यो यस्य जायते वध्यः स स्वप्नेऽपि कथञ्चन।
न तत्समीपमायाति तत् किमेवं प्रजल्पसि।

गङ्गदत्तः—भो। सत्यमेतत्। स्वभाववैरी त्वम् अस्माकम्। परं परपरिभवात् प्राप्तोऽहं ते सकाशम्।

प्रियदर्शनः—कथय, कस्मात् ते परिभवः।

गङ्गदत्तः—दायादेभ्यः।

प्रियदर्शनः—क्व ते आश्रयः, वाप्यां, कूपे, तडागे, ह्रदे वा ?

गङ्गदत्तः—पाषाणचयनिबद्धे कूपे।

प्रियदर्शनः—अहो ! अपदा वयं, तन्नास्ति तत्र मे प्रवेशः, प्रविष्टस्य च स्थानं नास्ति, यत्र स्थितः तव दायादान् व्यापादयिष्यामि। तद्गम्यताम्।

गङ्गदत्तः—भोः! समागच्छ त्वम्। अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि, तथा तस्य

मध्ये जलोपान्ते रम्यतरं कोटरम् अस्ति, तत्र स्थितस्त्वं लीलया मे दायादान् व्यापादयिष्यसि।

प्रियदर्शनः (स्वगतम्)–अहं तावत् परिणतवयाः कदाचित् कथञ्चित् मूषिकमेकं लभे। तत् सुखावहो जीवनोपायः अयम् अनेन कुलाङ्गारेण मम दर्शितः। तद्गत्वा तान् मण्डूकान् भक्षयामि।

(प्रकाशं ब्रूते)—भो गङ्गदत्त ! यद्येवं तदग्रे भव, येन तत्र गच्छावः।

गङ्गदत्तः—भोः प्रियदर्शन ! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानञ्च दर्शयिष्यामि, परं त्वया अस्मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि त एव भक्षणीया इति।

प्रियदर्शनः—साम्प्रतं त्वं मे मित्रं जातम्। तन्न भेतव्यम्। तव वचनेन भक्षणीयास्ते दायादाः।

गङ्गदत्तः—तदागच्छ, अहम् अरघट्टमार्गेण त्वां तत्र नयामि।

(सर्पो निष्क्रम्य मण्डूकम् आलिङ्गति। अथ तेन सर्पः कूपं नीतः। कोटरे धृतस्य च तस्य दर्शितास्ते दायादाः। स च शनैः शनैः सर्वानेव तान् भक्षयति। अथ मण्डूकाभावे वदति)

प्रियदर्शनः—भद्र ! निःशेषितास्ते रिपवः। तत् प्रयच्छ अन्यत् मे किञ्चित् भोजनम्। यतोऽहं त्वयात्रानीतः।

गङ्गदत्तः—भद्र ! कृतं त्वया मित्रकृत्यम्। तत् साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम्।

प्रियदर्शनः—सखे ! न सम्यगभिहितं भवता कथमहं तत्र गच्छामि ? मदीयबिलदुर्गम् अन्येन अधिकृतं भविष्यति, तस्मात् अत्र स्थितस्य मे मण्डूकम् एकैकं स्ववर्गीयं प्रयच्छ, नो चेत् सर्वानपि भक्षयिष्यामि।

(गङ्गदत्तः सर्व्वनाशभयेन एकैकं प्रयच्छति, सोऽपि तं भक्षयित्वा, परोक्षे अन्यानपि भक्षयति, अथ गंगदत्त-सुतो यमुनादत्तोऽपि तेनैकदा भक्षितः तं भक्षितं मत्वा, गङ्गदत्तो भृशं विलपन्नस्ति)

गङ्गदत्तस्य पत्नी कथयति—

किं क्रन्दासि दुराक्रन्द स्वपक्षक्षयकारक।
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति॥

तदद्यापि विचिन्त्यताम् आत्मनो निष्क्रमणम् अस्य वधोपायश्च।

(अथ कालेन सकलमपि कवलितं मण्डूककुलम्, केवलम् एको गङ्गदत्तस्तिष्ठति)

प्रियदर्शनः—भो गङ्गदत्त ! बुभुक्षितोऽहम् । निःशेषिताः सर्व्वे मण्डूकाः, तदीयतां मे किञ्चिद्भोजनम्, यतोऽहं त्वयात्रानीतः ।

गङ्गदत्तः—भो मित्र ! न त्वया मयि अवस्थिते कापि चिन्ता कार्य्या, तत् यदि मां प्रेषयसि तत् अन्यकूपस्थान् अपि मण्डूकान् विश्वास्य अत्र आनयामि ।

प्रियदर्शनः—मम तावत् त्वम् अभक्ष्यो भ्रातृस्थाने, यद्येवं करोषि तत् साम्प्रतं पितृस्थाने भवसि, तदेवं क्रियताम् ।

(गङ्गदत्तः तदाज्ञया कूपात् निष्क्रान्तः, प्रियदर्शनोऽपि तदागमनकाङ्क्षया तिष्ठति, अथ चिरात् अनागते गङ्गदत्ते, प्रियदर्शनः अपर-कोटरवासिनीं गोधाम् तदाकारणाय प्रेषयति ।)

गोधा (तमन्विष्य)—भद्र ! गङ्गदत्त ! स तव सुहृत् प्रियदर्शनः तव मार्गं प्रतीक्षमाणस्तिष्ठति । तदागम्यताम् एकाकिना अपि भवता द्रुततरं यदि अन्ये मण्डूका न आगच्छन्ति । स त्वां विना क्षणमपि तत्र स्थातुं न वाञ्छति ।

गङ्गदत्तः—

बुभुक्षितः किं न करोति पापं
क्षीणा जना निष्करुणा भवन्ति।
आख्याहि भद्रे! प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम्॥

यस्य कुलं शीलं गृहं च न ज्ञायते तेन सह संगतिः कर्त्तव्या न वा? तद्विषये बृहस्पतेः किं मतम्? गङ्गदत्तेन आहूतः प्रियदर्शनः कथं न सहसा स्वदुर्गात् निःसृतः? गङ्गदत्तस्य मैत्रीप्रस्तावमाकर्ण्य प्रियदर्शनः किं वदति? गङ्गदत्तः केनोपायेन सर्पं कूपमनयत् कुत्र च अस्थापयत्? उपकर्त्तारमपि गङ्गदत्तं प्रियदर्शनः कथं कुलाङ्गार इति वदति? किं स्वपक्षं परित्यज्य आगतं विपत्तौ मनसाऽऽद्रियते? नररुधिरमास्वाद्य व्याघ्रः किं नरवधाद् विरमति? गङ्गदत्तेन विसर्जितः प्रियदर्शनः कथं कूपं नात्यजत्? प्रियदर्शनेन प्रेषितां गोधां गङ्गदत्तः किं प्रत्यवदत्? भारतीये इतिहासे के के गङ्गदत्ताः सन्ति? त्वं कथयाऽनया कां शिक्षां लभसे?

व्याकरणस्य परिशिष्टम्

(संस्कृते नाम्नां (संज्ञानां) सर्वनाम्नां, विशेषणानां च सप्त विभक्तयो भवन्ति । ता यथा—प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी सप्तमी च । संबोधनं प्रथमायामेवान्तर्भवति । एकैकस्या विभक्तेस्त्रीणि त्रीणि वचनानि भवन्ति । तानि यथा—एकवचनम् द्विवचनम्, बहुवचनं च ।)

पुंलिङ्गशब्दरूपाणि

अकारान्तो रामशब्दः

	एकव०	द्विव०	बहुव०
प्रथमा	रामः	रामौ	रामाः
द्वितीया	रामम्	रामौ	रामान्
तृतीया	[1]रामेण	रामाभ्याम्	रामैः

---

१. I एक पद में वर्त्तमान ऋ, ॠ, र्, ष् के अनन्तर उसी पद के न को ण होता है। जैसे, ऋ+न=ऋण, पितॄ+नाम्=पितॄणाम्, संकीर्+नम्=संकीर्णम्, कृष+न=कृष्ण, पुष्+नाति=पुष्णाति । पाणिनि ने इसी बात को थोड़े से शब्दों में कह दिया है—रषाभ्यां नो णः समानपदे ८।४।१ और उसी पर कात्यायन ने वार्तिक चिपका दिया है—ऋवर्णान्नस्य णत्वं वाच्यम् ।

II. ऋ, ॠ, र् या ष् और न के बीच में यदि कुछ व्यवधायक वर्ण आ जायँ तो भी न को ण होता है, पर बीच में आनेवाले स्वर, कवर्ग, पवर्ग, य, व, ह अथवा अनुस्वार हों तभी; इनके अतिरिक्त किसी अन्य वर्ण के रहने पर ण कदापि न होगा। जैसे, र्+आ+म्+ए+न=

चतुर्थी	रामाय	,,	रामेभ्यः
पञ्चमी	रामात्	,,	,,
षष्ठी	रामस्य	रामयोः	रामाणाम्
सप्तमी	रामे	,,	रामेषु
सम्बोध०	हे राम	हे रामौ	हे रामाः

एवं बालक, नर, मनुष्य, सूर्य, चन्द्र, व्याघ्र, पर्वत, पुत्र, रथ, रासभ, जन, काक, कच्छप, कुञ्जर, ग्राम, दन्त, हस्त, पाद, कर, चरण,-ईश्वर, सिंह, वृक्ष, शुक, मेघादि-शब्दा अपि ज्ञातव्याः ।

इकारान्तः कविशब्दः

प्र०	कविः	कवी	कवयः
द्वि०	कविम्	कवी	कवीन्
तृ०	कविना	कविभ्याम्	कविभिः
च०	कवये	,,	कविभ्यः
पं०	कवेः	,,	,,
ष०	कवेः	कव्योः	कवीनाम्
स०	कवौ	कव्योः	कविषु
सं०	हे कवे	हे कवी	हे कवयः

रामेण, सूर् + य् + आ + नाम्=सूर्याणाम् । आदर् + श् + ए + न= आदर्शेन, यहाँ न को ण न होगा, क्योंकि परिगणित वर्णों से भिन्न व्यवधायक 'श्' आ गया है। पाणिनि—अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२ इसकी व्याख्या द्वितीय भाग में देखिए ।

एवं हरि, मुनि, कपि, गिरि, जलधि, नृपति, पाणि, व्याधि, वह्नि, सन्धि-सदृशा अन्येऽपि ।

तादृशः पतिशब्दः

	ए०	द्वि०	ब०
प्र०	पतिः	पती	पतयः
द्वि०	पतिम्	पती	पतीन्
तृ०	पत्या	पतिभ्याम्	पतिभिः
च०	पत्ये	,,	पतिभ्यः
पं०	पत्युः	,,	,,
ष०	,,	पत्योः	पतीनाम्
स०	पत्यौ	,,	पतिषु
सं०	हे पते	हे पती	हे पतयः

तादृश एव सखिशब्दः

प्र०	सखा	सखायौ	सखायः
द्वि०	सखायम्	,,	सखीन्
तृ०	सख्या	सखिभ्याम्	सखिभिः
च०	सख्ये	,,	सखिभ्यः
पं०	सख्युः	,,	,,
ष०	,,	सख्योः	सखीनाम्
स०	सख्यौ	,,	सखिषु
सं०	हे सखे	हे सखायौ	हे सखायः

उकारान्तः शम्भुशब्दः

	एकव०	द्विव०	बहुव०
प्र०	शम्भुः	शम्भू	शम्भवः
द्वि०	शम्भुम्	शम्भू	शम्भून्
तृ०	शम्भुना	शम्भुभ्याम्	शम्भुभिः
च०	शम्भवे	,,	शम्भुभ्यः
पं०	शम्भोः	,,	,,
ष०	,,	शम्भ्वोः	शम्भूनाम्
स०	शम्भौ	,,	शम्भुषु
सं०	हे शम्भो	हे शम्भू	हे शम्भवः

एवं भानु, गुरु, शिशु, विधु, पशु, तरु, वायु, बाहु, शत्रु,-इषु,-ऊरु-सदृशा अपि ।

ऋकारान्तः पितृशब्दः

प्र०	पिता	पितरौ	पितरः
द्वि०	पितरम्	,,	पितॄन्
तृ०	पित्रा	पितृभ्याम्	पितृभिः
च०	पित्रे	,,	पितृभ्यः
पं०	पितुः	,,	,,
ष०	,,	पित्रोः	पितॄणाम्
स०	पितरि	,,	पितृषु
सं०	हे पितः	हे पितरौ	हे पितरः

एवं भ्रातृ, जामातृ-शब्दौ ज्ञेयौ ।

तत्सदृशो दातृशब्दः

प्र०	दाता	दातारौ	दातारः
द्वि०	दातारं	दातारौ	दातॄन्
तृ०	दात्रा	दातृभ्याम्	दातृभिः
च०	दात्रे	,,	दातृभ्यः
पं०	दातुः	,,	,,
ष०	,,	दात्रोः	दातॄणाम्
स०	दातरि	दात्रोः	दातृषु
सं०	हे दातः	हे दातारौ	हे दातारः

एवं विधातृ, सवितृ, कर्त्तृ, हर्त्तृ, गन्तृ, नप्तृ[1] योद्धृ, वक्तृ-सदृशा अपि ।

ओकारान्तो गोशब्दः

	ए०	द्वि०	ब०
प्र०	गौः	गावौ	गावः
द्वि०	गाम्	,,	गाः
तृ०	गवा	गोभ्याम्	गोभिः
च०	गवे	,,	गोभ्यः
पं०	गोः	गोभ्याम्	गोभ्यः
ष०	,,	गवोः	गवाम्
स०	गवि	,,	गोषु
सं०	हे गौः	हे गावौ	हे गावः

१. cf. नाती ।

तकारान्तः पठत्-शब्दः

प्र०	पठन्	पठन्तौ	पठन्तः
द्वि०	पठन्तं	,,	पठतः
तृ०	पठता	पठद्भ्याम्	पठद्भिः
च०	पठते	,,	पठद्भ्यः
पं०	पठतः	,,	,,
ष०	,,	पठतोः	पठताम्
स०	पठति	,,	पठत्सु
सं०	हे पठन्	हे पठन्तौ	हे पठन्तः

एवं चलत्, तिष्ठत्, कुर्वत्, चोरयत्, जानत्, गृह्णदादयो वर्तमानकृदन्ताः प्रायः सर्वेऽपि ।

नकारान्तो राजन्-शब्दः

प्र०	राजा	राजानौ	राजानः
द्वि०	राजानम्	,,	राज्ञः
तृ०	राज्ञा	राजभ्याम्	राजभिः
च०	राज्ञे	,,	राजभ्यः
पं०	राज्ञः	,,	,,
ष०	राज्ञः	राज्ञोः	राज्ञाम्
स०	{ राज्ञि राजनि	,,	राजसु
सं०	हे राजन्	हे राजानौ	हे राजानः

एवं मूर्धन्[1], महिमन्, म्रदिमन् कालिमन्-सदृशा अन्येऽपि ।

१. cf. मुड्ढा=सिर ।

तादृश आत्मन्-शब्दः

प्र०	आत्मा	आत्मानौ	आत्मानः
द्वि०	आत्मानम्	,,	आत्मनः
तृ०	आत्मना	आत्मभ्याम्	आत्मभिः
च०	आत्मने	,,	आत्मभ्यः
पं०	आत्मनः	,,	,,
ष०	,,	आत्मनोः	आत्मनाम्
स०	आत्मनि	,,	आत्मसु
सं०	हे आत्मन्	हे आत्मानौ	हे आत्मानः

एवम् अध्वन्, अश्मन्, ब्रह्मन्, यज्वन्, विश्वकर्मन्-सदृशा अपि ज्ञेयाः।

इन्नन्तः करिन्ः शब्दः

	ए०	द्वि०	ब०
प्र०	करी	करिणौ	करिणः
द्वि०	करिणम्	,,	,,
तृ०	करिणा	करिभ्याम्	करिभिः
च०	करिणे	,,	करिभ्यः
पं०	करिणः	,,	,,
ष०	करिणः	करिणोः	करिणाम्
स०	करिणि	,,	करिषु
सं०	हे करिन्	हे करिणौ	हे करिणः

एवं धनिन्, गुणिन्, यशस्विन्, तपस्विन्-सदृशाः।

स्त्रीलिङ्गशब्दरूपाणि

आकारान्तो रमाशब्दः

	ए०	द्वि०	ब०
प्र०	रमा	रमे	रमाः
द्वि०	रमाम्	रमे	,,
तृ०	रमया	रमाभ्याम्	रमाभिः
च०	रमायै	,,	रमाभ्यः
पं०	रमायाः	,,	,,
ष०	,,	रमयोः	रमाणाम्
स०	रमायाम्	,,	रमासु
सं०	हे रमे	हे रमे	हे रमाः

एवं विद्या, लता, भार्या, बाला, निशा, कन्या, माला, चिन्ता, लज्जा, वार्त्ता, मृत्तिका, शाखा, सुधा-प्रभृतयोऽन्येऽपि।

इकारान्तो रुचिशब्दः

प्र०	रुचिः	रुची	रुचयः
द्वि०	रुचिम्	,,	रुचीः
तृ०	रुच्या	रुचिभ्याम्	रुचिभिः
च०	रुच्यै, रुचये	,,	रुचिभ्यः
पं०	रुच्याः, रुचेः	,,	,,
ष०	रुच्याः, रुचेः	रुच्योः	रुचीनाम्

स०	रुच्याम्, रुचौ	,,	रुचिषु
सं०	हे रुचे	हे रुची	हे रुचयः

एवं मति, बुद्धि, रात्रि, प्रीति, मूर्त्ति, स्मृति, भूमि, पंक्ति, मुक्ति, नीति, सृष्टि, कीर्ति, धृति-प्रभृतयः शब्दा अपि।

ईकारान्तो नदीशब्दः

	ए०	द्वि०	ब०
प्र०	नदी	नद्यौ	नद्यः
द्वि०	नदीम्	,,	नदीः
तृ०	नद्या	नदीभ्याम्	नदीभिः
च०	नद्यै	नदीभ्याम्	नदीभ्यः
पं०	नद्याः	,,	,,
ष०	,,	नद्योः	नदीनाम्
स०	नद्याम्	,,	नदीषु
सं०	हे नदि	हे नद्यौ	हे नद्यः

एवं जननी, देवी, पृथ्वी, लेखनी, रजनी, नारी, कुमारी, कौमुदी, कमलिनी, रुक्मिणी, सर्पिणी-शब्दास्तत्सदृशा अन्ये च।

तत्सदृशः श्रीशब्दः

प्र०	श्रीः	श्रियौ	श्रियः
द्वि०	श्रियम्	,,	,,
तृ०	श्रिया	श्रीभ्याम्	श्रीभिः
च०	श्रियै, श्रिये	,,	श्रीभ्यः

पं०	श्रियाः, श्रियः	,,	,,
ष०	,, ,,	श्रियोः	श्रीणाम्, श्रियाम्,
स०	श्रियाम्, श्रियि	,,	श्रीषु
सं०	हे श्रीः	हे श्रियौ	हे श्रियः

एवं धी, ह्री, भी-प्रभृतयः शब्दाः ।

तत्सदृशः स्त्रीशब्दः

	ए०	द्वि०	ब०
प्र०	स्त्री	स्त्रियौ	स्त्रियः
द्वि०	स्त्रियम्, स्त्रीम्	,,	स्त्रियः, स्त्रीः
तृ०	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च०	स्त्रियै	,,	स्त्रीभ्यः
पं०	स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः
ष०	,,	स्त्रियोः	स्त्रीणाम्
स०	स्त्रियाम्	,,	स्त्रीषु
सं०	हे स्त्रि	हे स्त्रियौ	हे स्त्रियः

उकारान्तो धेनुशब्दः

प्र०	धेनुः	धेनू	धेनवः
द्वि०	धेनुम्	,,	धेनूः
तृ०	धेन्वा	धेनुभ्याम्	धेनुभिः
च०	धेन्वै, धेनवे	,,	धेनुभ्यः
पं०	धेन्वाः, धेनोः	,,	,,

ष०	,, ,,	धेन्वोः	धेनूनाम्
स०	धेन्वाम्, धेनौ	,,	धेनुषु
सं०	हे धेनो	हे धेनू	हे धेनवः

एवं तनु, रज्जु, करेणु[1], कर्कन्धु[2]-सदृशास्तथा

ऊकारान्तो वधूशब्दः

प्र०	वधूः	वध्वौ	वध्वः
द्वि०	वधूम्	,,	वधूः
तृ०	वध्वा	वधूभ्याम्	वधूभिः
च०	वध्वै	,,	वधूभ्यः
पं०	वध्वाः	,,	,,
ष०	,,	वध्वोः	वधूनाम्
स०	वध्वाम्	,,	वधूषु
सं०	हे वधु	हे वध्वौ	हे वध्वः

एवं चञ्चू, तनू, श्वश्रू[3], कर्कन्धू, चमू-प्रभृतयः शब्दाः ।

ऋकारान्तो मातृशब्दः

	ए०	द्वि०	ब०
प्र०	माता	मातरौ	मातरः
द्वि०	मातरम्	,,	मातॄः
तृ०	मात्रा	मातृभ्याम्	मातृभिः
च०	मात्रे	,,	मातृभ्यः

---

१. करेणु=हथिनी । २. कर्कन्धु=बेर । ३. cf. सासू ।

पं०	मातुः	,,	,,
ष०	मातुः	मात्रोः	मातॄणाम्
स०	मातरि	,,	मातृषु
सं०	हे मातः	हे मातरौ	हे मातरः

एवं दुहितृ[1], ननान्दृ[2] यातृ[3]-शब्दा अपि।

तत्सदृशः स्वसृ[4] शब्दः

प्र०	स्वसा	स्वसारौ	स्वसारः
द्वि०	स्वसारं	,,	स्वसॄः

शेषं मातृवत्।

नपुंसकलिङ्गशब्दरूपाणि

अकारान्तो ज्ञानशब्दः

	ए०	द्वि०	ब०
प्र०	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वि०	,,	,,	,,
तृ०	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
च०	ज्ञानाय	,,	ज्ञानेभ्यः
पं०	ज्ञानात्	,,	,,

---

१. cf. धीया। २. cf ननद। ३. cf. जाई=देवरानी या जेठानी।
४. cf. Sister.

ष०	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
स०	ज्ञाने	,,	ज्ञानेषु
सं०	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

एवं फल, धन, पत्र,-अन्न,-औषध,-आसन, तृण, वन,-उद्यान, दुग्ध, जल, पुस्तक, पुष्प, चित्र, मित्र, गृह, द्रव्य,-अनृतादयोऽपि ।

इकारान्तो वारिशब्दः

प्र०	वारि	वारिणी	वारीणि
द्वि०	,,	,,	,,
तृ०	वारिणा	वारिभ्याम्	वारिभिः
च०	वारिणे	,,	वारिभ्यः
पं०	वारिणः	,,	,,
ष०	,,	वारिणोः	वारीणाम्
स०	वारिणि	,,	वारिषु
सं०	हे वारे, हे वारि	हे वारिणी	हे वारीणि

तादृशो दधिशब्दः

	ए०	द्वि० व०	ब०
प्र०	दधि	दधिनी	दधीनि
द्वि०	,,	,,	,,
तृ०	दध्ना	दधिभ्याम्	दधिभिः
च०	दध्ने	,,	दधिभ्यः
पं०	दध्नः	,,	,,

ष०	दध्नः	दध्नोः	दध्नाम्
स०	दध्नि, दधनि	,,	दधिषु
सं०	हे दधे, हे दधि	हे दधिनी	हे दधीनि

एवम् अस्थिसक्थि-शब्दावपि ।

उकारान्तो मधुशब्दः

प्र०	मधु	मधुनी	मधूनि
द्वि०	,,	,,	,,
तृ०	मधुना	मधुभ्याम्	मधुभिः
च०	मधुने	,,	मधुभ्यः
पं०	मधुनः	,,	,,
ष०	,,	मधुनोः	मधूनाम्
स०	मधुनि	,,	मधुषु
सं०	हे मधो, हे मधु	हे मधुनी	हे मधूनि

एवं जानु, दारु,-अम्बु, श्मश्रु[1], वस्तु,-अश्रु[2]-सदृशा अन्येऽपि ।

तकारान्तो जगत्-शब्दः

प्र०	जगत्	जगती	जगन्ति
द्वि०	,,	,,	,,
तृ०	जगता	जगद्भ्याम्	जगद्भिः
च०	जगते	,,	जगद्भ्यः
पं०	जगतः	जगद्भ्याम्	जगद्भ्यः

---

१. cf. मूछ । २. cf. आँसू ।

ष०	,,	जगतोः	जगताम्
स०	जगति	,,	जगत्सु
सं०	हे जगत्	हे जगती	हे जगन्ति

नकारान्तो नामन्-शब्दः

प्र०	नाम	नाम्नी, नामनी	नामानि
द्वि०	,,	,,	,,
तृ०	नाम्ना	नामभ्याम्	नामभिः
च०	नाम्ने	,,	नामभ्यः
पं०	नाम्नः	,,	,,
ष०	,,	नाम्नोः	नाम्नाम्
स०	नाम्नि, नामनि	,,	नामसु
सं०	हे नाम, हे नामन्	हे नाम्नी, हे नामनी	हे नामानि

एवं प्रेमन्, धामन्, व्योमन्, हेमन्, जन्मन्, रोमन्[1], भस्मन्, दामन्[2], वेश्मन्[3], चर्मन् प्रभृतयः शब्दाः।

सकारान्तो धनुस्-शब्दः

प्र०	धनुः	धनुषी	धनूंषि
द्वि०	,,	,,	,,
तृ०	धनुषा	धनुर्भ्याम्	धनुर्भिः
च०	धनुषे	,,	धनुर्भ्यः
पं०	धनुषः	,,	,,

---

१. cf. रोयाँ। २. cf. दाँवरी। ३. वेश्मन्=घर।

ष०	,,	धनुषोः	धनुषाम्
स०	धनुषि	,,	धनुष्षु
सं०	हे धनुः	हे धनुषी	हे धनूंषि

एवम् आयुस्, अरुस्[1], जनुस्-सदृशा अन्येऽपि।

तादृशः पयस्-शब्दः

प्र०	पयः	पयसी	पयांसि
द्वि०	,,	,,	,,
तृ०	पयसा	पयोभ्याम्	पयोभिः
च०	पयसे	,,	पयोभ्यः
पं०	पयसः	,,	,,
ष०	,,	पयसोः	पयसाम्
स०	पयसि	,,	पयस्सु
सं०	हे पयः	हे पयसी	हे पयांसि

एवं तपस्, चेतस्, मनस्, सदस्, वचस्, वक्षस्, तमस्, यशस्, तेजस्, शिरस्, सरस्, रजस्, अयस्[2], अम्भस्[3], नभस्-सदृशा अन्येऽपि शब्दाः।

सर्वनामशब्दरूपाणि

मकारान्त इदम्-शब्दः

(पुंलिङ्ग)

	ए०	द्वि०	ब०
प्र०	अयम्	इमौ	इमे

---

१. अरुस्=फफोला, घाव। २. अयस्=लोहा। ३. अम्भस्=पानी।

द्वि०	इमम्, एनम्	,, एनौ	इमान्, एनान्
तृ०	अनेन, एनेन	आभ्याम्	एभिः
च०	अस्मै	आभ्याम्	एभ्यः
पं०	अस्मात्	,,	एभ्यः
ष०	अस्य	अनयोः, एनयोः	एषाम्
स०	अस्मिन्	,, ,,	एषु

सर्वनामशब्दानां सम्बोधनं न भवति ।

(स्त्रीलिङ्गे)

प्र०	इयम्	इमे	इमाः
द्वि०	इमाम्, एनाम्	,, एने	,, एनाः
तृ०	अनया, एनया	आभ्याम्	आभिः
च०	अस्यै	,,	आभ्यः
पं०	अस्याः	,,	,,
ष०	,,	अनयोः, एनयोः	आसाम्
स०	अस्याम्	,, ,,	आसु

(नपुंसकलिङ्गे)

प्र०	इदम्	इमे	इमानि
द्वि०	,, एनत्	,, एने	,, एनानि

शेषं पुंवत्

दकारान्तस्तद्-शब्दः
(पुंलिङ्गे)

	ए०	द्वि०	ब०
प्र०	सः	तौ	ते
द्वि०	तम्	,,	तान्
तृ०	तेन	ताभ्याम्	तैः
च०	तस्मै	,,	तेभ्यः
पं०	तस्मात्	,,	,,
ष०	तस्य	तयोः	तेषाम्
स०	तस्मिन्	,,	तेषु

(स्त्रीलिङ्गे)

प्र०	सा	ते	ताः
द्वि०	ताम्	,,	,,
तृ०	तया	ताभ्याम्	ताभिः
च०	तस्यै	,,	ताभ्यः
पं०	तस्याः	,,	,,
ष०	,,	तयोः	तासाम्
स०	तस्याम्	,,	तासु

नपुं०

प्र०	तत्	ते	तानि
द्वि०	,,	,,	,,

शेषं पुंलिङ्गवत् ।

दकारान्तो यद्-शब्दः

(पुं०)

	ए०	द्वि०	ब०
प्र०	यः	यौ	ये
द्वि०	यम्	,,	यान्
तृ०	येन	याभ्याम्	यैः
च०	यस्मै	,,	येभ्यः
पं०	यस्मात्	,,	,,
ष०	यस्य	ययोः	येषाम्
स०	यस्मिन्	ययोः	येषु

(स्त्री०)

प्र०	या	ये	याः
द्वि०	याम्	,,	,,
तृ०	यया	याभ्याम्	याभिः
च०	यस्यै	,,	याभ्यः
पं०	यस्याः	,,	,,
ष०	,,	ययोः	यासाम्
स०	यस्याम्	,,	यासु

(नपुं०)

प्र०	यत्	ये	यानि
द्वि०	,,	,,	,,

शेषं पुंलिङ्गवत् ।

मकारान्तः किम्-शब्दः

(पुं०)

	ए०	द्वि०	ब०
प्र०	कः	कौ	के
द्वि०	कम्	,,	कान्
तृ०	केन	काभ्याम्	कैः
च०	कस्मै	,,	केभ्यः
पं०	कस्मात्	,,	,,
ष०	कस्य	कयोः	केषाम्
स०	कस्मिन्	,,	केषु

(स्त्री०)

प्र०	का	के	काः
द्वि०	काम्	,,	,,
तृ०	कया	काभ्याम्	काभिः
च०	कस्यै	,,	काभ्यः
पं०	कस्याः	,,	,,
ष०	,,	कयोः	कासाम्
स०	कस्याम्	,,	कासु

(नपुं०)

प्र०	किम्	के	कानि
द्वि०	,,	,,	,,

शेषं पुंलिङ्गवत् ।

दकारान्त एतद्-शब्दः ।

(पुं०)

	ए०	द्वि	ब०
प्र०	एषः	एतौ	एते
द्वि०	एतम्, एनम्	एतौ, एनौ	एतान्, एनान्
तृ०	एतेन, एनेन	एताभ्याम्	एतैः
च०	एतस्मै	,,	एतेभ्यः
पं०	एतस्मात्	,,	,,
ष०	एतस्य	एतयोः, एनयोः	एतेषाम्
स०	एतस्मिन्	एतयोः, एनयोः	एतेषु

(स्त्री०)

प्र०	एषा	एते	एताः
द्वि०	एताम्, एनाम्	एते, एने	,, एनाः
तृ०	एतया, एनया	एताभ्याम्	एताभिः
च०	एतस्यै	,,	एताभ्यः
पं०	एतस्याः	,,	,,
ष०	,,	एतयोः, एनयोः	एतासाम्
स०	एतस्याम्	,, ,,	एतासु

(नपुं०)

प्र०	एतत्	एते	एतानि
द्वि०	,, एनत्	,, एने	,, एनानि

शेषं पुंलिङ्गवत् ।

सकारान्तोऽदस् -शब्दः

(पुं०)

	ए०	द्वि०	व०
प्र०	असौ	अमू	अमी
द्वि०	अमुम्	,,	अमून्
तृ०	अमुना	अमूभ्याम्	अमीभिः
च०	अमुष्मै	अमूभ्याम्	अमीभ्यः
पं०	अमुष्मात्	,,	,,
ष०	अमुष्य	अमुयोः	अमीषाम्
स०	अमुष्मिन्	,,	अमीषु

(स्त्री०)

प्र०	असौ	अमू	अमूः
द्वि०	अमूम्	,,	,,
तृ०	अमुया	अमूभ्याम्	अमूभिः
च०	अमुष्यै	,,	अमूभ्यः
पं०	अमुष्याः	,,	अमूभ्यः
ष०	,,	अमुयोः	अमूषाम्
स०	अमुष्याम्	,,	अमूषु

नपुं०

प्र०	अदः	अमू	अमूनि
द्वि०	,,	,,	,,

शेष पुंलिङ्गवत् ।

संख्यावाचकाः शब्दाः

एक-शब्दः

	ए० व० (पुं०)	ए० व० (स्त्री०)	ए० व० (नपुं०)
प्र०	एकः	एका	एकम्
द्वि०	एकम्	एकाम्	,,
तृ०	एकेन	एकया	एकेन
च०	एकस्मै	एकस्यै	एकस्मै
पं०	एकस्मात्	एकस्याः	एकस्मात्
ष०	एकस्य	,,	एकस्य
स०	एकस्मिन्	एकस्याम्	एकस्मिन्

द्वि-शब्दः

द्वि० व०

	(पुं०)	(स्त्री०)	(नपुं०)
प्र०	द्वौ	द्वे	
द्वि०	,,	,,	
तृ०	द्वाभ्याम्	द्वाभ्याम्	
च०	,,	,,	
पं०	,,	,,	
ष०	द्वयोः	द्वयोः	
स०	,,	,,	

त्रि-शब्दः

	ब० व० (पुंलिङ्गे)	ब० व० (नपुंसके)
प्र०	त्रयः	त्रीणि
द्वि०	त्रीन्	,,
तृ०	त्रिभिः	त्रिभिः
च०	त्रिभ्यः	त्रिभ्यः
पं०	,,	,,
ष०	त्रयाणाम्	त्रयाणाम्
स०	त्रिषु	त्रिषु

चतुर्-शब्दः

	(पुंलिङ्गे) ब० व०	(नपुंसके) ब० व०
प्र०	चत्वारः	चत्वारि
द्वि०	चतुरः	,,
तृ०	चतुर्भिः	चतुर्भिः
च०	चतुर्भ्यः	चतुर्भ्यः
पं०	,,	,,
ष०	चतुर्णाम्	चतुर्णाम्
स०	चतुर्षु	चतुर्षु

पञ्चन्-षष्-सप्तन्-नवन्-दशन्-शब्दाः त्रिषु लिङ्गेषु सरूपाः

प्र०	पञ्च	षट्	सप्त	नव	दश
द्वि०	,,	,,	,,	नव	दश
तृ०	पञ्चभिः	षड्भिः	सप्तभिः	नवभिः	दशभिः
च०	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	नवभ्यः	दशभ्यः
पं०	,,	,,	,,	,,	,,
ष०	पञ्चानाम्	षण्णाम्	सप्तानाम्	नवानाम्	दशानाम्
स०	पञ्चसु	षट्सु	सप्तसु	नवसु	दशसु

अष्टन्-शब्दः

	ब० व०
प्र०	अष्टौ, अष्ट
द्वि०	,, ,,
तृ०	अष्टभिः अष्टाभिः
च०	अष्टभ्यः, अष्टाभ्यः
पं०	,, ,,
ष०	अष्टानाम्
स०	अष्टसु, अष्टासु

एकादश	११	षोडश	१६
द्वादश	१२	सप्तदश	१७
त्रयोदश	१३	अष्टादश	१८
चतुर्दश	१४	(अन्यासु विभक्तिषु दशन्-शब्दवत्)	
पञ्चदश	१५		

ऊनविंशतिः	१९	सप्ततिः	७०
विंशतिः	२०	अशीतिः	८०
एकविंशतिः	२१	द्व्यशीतिः	८२
द्वाविंशतिः	२२	त्र्यशीतिः	८३
त्रयोविंशतिः	२३	नवतिः	९०
चतुर्विंशतिः	२४	षण्णवतिः	९६
+ +		(एते शब्दा एकवचने प्रयुज्यन्ते)	
अष्टाविंशतिः, अष्टविंशतिः	२८	शतम्	१००
		एकाधिकशतम्	१०१
ऊनत्रिंशत्	२९	द्व्यधिकशतम्	१०२
		त्र्यधिकशतम्	१०३
त्रिंशत्	३०	दशाधिकशतम्	११०
+ +		+ +	
त्रयस्त्रिंशत्	३३	द्वे शते	२००
+ +		त्रीणि शतानि	३००
ऊनचत्वारिंशत्	३९	सहस्रम्	१०००
चत्वारिंशत्	४०	द्वे सहस्रे	२०००
+ +		लक्षम्	१०००००
ऊनपञ्चाशत्	४९		
पञ्चाशत्	५०	द्वे लक्षे	२०००००
+ +			
षष्टिः	६०	कोटिः	१०००००००

(धातवो द्विविधाः परस्मैपदिन आत्मनेपदिनश्च । ते यथायथं दशसु गणेषु विभक्ताः, तेषु केषांचिद् गणानां कतिपयानां धातूनां रूपाणि निर्दिश्यन्ते)

परस्मैपदिनो धातवः

भ्वादि (भू+आदि) गणः

भू (भव्)–सत्तायाम्

वर्त्तमानकाले (लट्-लकारः)

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	भवति	भवतः	भवन्ति
म० पु०	भवसि	भवथः	भवथ
उ० पु०	भवामि	भवावः	भवामः

प्रवर्त्तनायां (लोट्)

प्र० पु०	भवतु	भवताम्	भवन्तु
म० पु०	भव	भवतम्	भवत
उ० पु०	भवानि	भवाव	भवाम

विधौ (लिङ्)

प्र० पु०	भवेत्	भवेताम्	भवेयुः
म० पु०	भवेः	भवेतम्	भवेत
उ० पु०	भवेयम्	भवेव	भवेम

अनद्यतनभूते (लङ्)

प्र० पु०	अभवत्	अभवताम्	अभवन्
म० पु०	अभवः	अभवतम्	अभवत
उ० पु०	अभवम्	अभवाव	अभवाम

सामान्यभविष्यति (लृट्)

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	भविष्यति	भविष्यतः	भविष्यन्ति
म० पु०	भविष्यसि	भविष्यथः	भविष्यथ
उ० पु०	भविष्यामि	भविष्यावः	भविष्यामः

एवमन्येऽपि गम् (गच्छ्), नी (नय्), पत्, तप्, वृष् (वर्ष्), हस्, बुध् (बोध्), शुच् (शोच्), रक्ष् , वद्, वस्, वाञ्छ्, सृ (सर्), चर्, जीव्, त्यज्, दह्, नम्, पच्, जि (जय्), दृश् (पश्य्), धाव्, भ्रम्, पा (पिब्), सद् (सीद्), यज्, वह्, स्मृ (स्मर्), हृ (हर्), तृ (तर्), अट्, गल्, चल्, जल्प्, निन्द्, शंस्, क्षि (क्षय्), द्रु (द्रव्), मूर्च्छ्, रुह् (रोह्), स्था (तिष्ठ्), ह्वे (ह्वय्), दा (यच्छ्), नन्द्, खन्, अर्ह्, फल्, गै (गाय्), क्रीड्, भज् प्रभृतयः ।

अदादिगणः

अस्–भवने

वर्त्तमानकाले (लट्)

प्र० पु०	अस्ति	स्तः	सन्ति

म० पु०	असि	स्थः	स्थ
उ० पु०	अस्मि	स्वः	स्मः

प्रवर्त्तनायां (लोट्)

प्र० पु०	अस्तु	स्ताम्	सन्तु
म० प्र०	एधि	स्तम्	स्त
उ० पु०	असानि	असाव	असाम

विधौ (लिङ्)

प्र० पु०	स्यात्	स्याताम्	स्युः
म० पु०	स्याः	स्यातम्	स्यात
उ० पु०	स्याम्	स्याव	स्याम

अनद्यतनभूते (लङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	आसीत्	आस्ताम्	आसन्
म० पु०	आसीः	आस्तम्	आस्त
उ० पु०	आसम्	आस्व	आस्म

सामान्यभविष्यति (लृट्)

प्र० पु०	भविष्यन्ति	भविष्यतः	भविष्यन्ति
म० पु०	भविष्यसि	भविष्यथः	भविष्यथ
उ० पु०	भविष्यामि	भविष्यावः	भविष्यामः

जुहोत्यादिगणः

दा—दाने

वर्त्तमाने (लट्)

प्र० पु०	ददाति	दत्तः	ददति
म० पु०	ददासि	दत्थः	दत्थ
उ० पु०	ददामि	दद्वः	दद्मः

प्रवर्त्तनायां (लोट्)

प्र० पु०	ददातु	दत्ताम्	ददतु
म० पु०	देहि	दत्तम्	दत्त
उ० पु०	ददानि	ददाव	ददाम

विधौ (लिङ्)

प्र० पु०	दद्यात्	दद्याताम्	दद्युः
म० पु०	दद्याः	दद्यातम्	दद्यात
उ० पु०	दद्याम्	दद्याव	दद्याम

अनद्यतनभूते (लङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	अददात्	अदत्ताम्	अददुः
म० पु०	अददाः	अदत्तम्	अदत्त
उ० पु०	अददाम्	अदद्व	अदद्म

सामान्यभविष्यति (लृट्)

प्र० पु०	दास्यति	दास्यतः	दास्यन्ति
म० पु०	दास्यसि	दास्यथः	दास्यथ
उ० पु०	दास्यामि	दास्यावः	दास्यामः

दिवादिगणः

नृत्—नृत्ये

वर्त्तमाने (लट्)

प्र० पु०	नृत्यति	नृत्यतः	नृत्यन्ति
म० पु०	नृत्यसि	नृत्यथः	नृत्यथ
उ० पु०	नृत्यामि	नृत्यावः	नृत्यामः

प्रवर्त्तनायां (लोट्)

प्र० पु०	नृत्यतु	नृत्यताम्	नृत्यन्तु
म० पु०	नृत्य	नृत्यतम्	नृत्यत
उ० पु०	नृत्यानि	नृत्याव	नृत्याम

विधौ (लिङ्)

प्र० पु०	नृत्येत्	नृत्येताम्	नृत्येयुः
म० पु०	नृत्येः	नृत्येतम्	नृत्येत
उ० पु०	नृत्येयम्	नृत्येव	नृत्येम

अनद्यतनभूते (लङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	अनृत्यत्	अनृत्यताम्	अनृत्यन्

म० पु०	अनृत्यः	अनृत्यतम्	अनृत्यत
उ० पु०	अनृत्यम्	अनृत्याव	अनृत्याम

सामान्यभविष्यति (लृट्)

प्र० पु०	नर्त्तिष्यति, नर्त्स्यति	नर्त्तिष्यतः नर्त्स्यतः	नर्त्तिष्यन्ति, नर्त्स्यन्ति
म० पु०	नर्त्तिष्यसि, नर्त्स्यसि	नर्त्तिष्यथः, नर्त्स्यथः	नर्त्तिष्यथ, नर्त्स्यथ
उ० पु०	नर्त्तिष्यामि, नर्त्स्यामि	नर्त्तिष्यावः, नर्त्स्यावः	नर्त्तिष्यामः, नर्त्स्यामः

एवं नश्, पुष्, लुभ् तुष्, शुष्, कुप्, क्षुभ्, द्रुह्, हृष्, श्लिष्, मद् (माद्), क्षुध्, स्निह्, शक्, शम् (शाम्), श्रम् (श्राम्), क्षम् (क्षाम्) प्रभृतयो धातवः ।

स्वादिगणः

श्रु[१]—श्रवणे

वर्त्तमाने (लट्)

प्र० पु०	शृणोति	शृणुतः	शृण्वन्ति
म० पु०	शृणोषि	शृणुथः	शृणुथ
उ० पु०	शृणोमि	शृणुवः, शृण्वः	शृणुमः, शृण्मः

प्रवर्त्तनायां (लोट्)

प्र० पु०	शृणोतु	शृणुताम्	शृण्वन्तु

१. सिद्धान्तकौमुद्यामयं भ्वादिगणे पठितोपि लाघवार्थमत्रोक्तः ।

म० पु०	शृणु	शृणुतम्	शृणुत
उ० पु०	शृणवानि	शृणवाव	शृणवाम

विधौ (लिङ्)

	एकव०	द्वि०	बहुव०
प्र० पु०	शृणुयात्	शृणुयाताम्	शृणुयुः
म० पु०	शृणुयाः	शृणुयातम्	शृणुयात
उ० पु०	शृणुयाम्	शृणुयाव	शृणुयाम

अनद्यतनभूते (लङ्)

प्र० पु०	अशृणोत्	अशृणुताम्	अशृण्वन्
म० पु०	अशृणोः	अशृणुतम्	अशृणुत
उ० पु०	अशृणवम्	अशृणुव, अशृण्व	अशृणुम, अशृण्म

सामान्यभविष्यति (लृट्)

प्र० पु०	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति
म० पु०	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ
उ० पु०	श्रोष्यामि	श्रोष्यावः	श्रोष्यामः

तुदादिगणः

प्रच्छ्—प्रश्नकरणे

वर्त्तमानकाले (लट्)

प्र० पु०	पृच्छति	पृच्छतः	पृच्छन्ति
म० पु०	पृच्छसि	पृच्छथः	पृच्छथ
उ० पु०	पृच्छामि	पृच्छावः	पृच्छामः

प्रवर्त्तनायां (लोट्)

प्र० पु०	पृच्छतु	पृच्छताम्	पृच्छन्तु
म० पु०	पृच्छ	पृच्छतम्	पृच्छत
उ० पु०	पृच्छानि	पृच्छाव	पृच्छाम

विधौ (लिङ्)

	एकव०	द्विव०	बहुव
प्र० पु०	पृच्छेत्	पृच्छेताम्	पृच्छेयुः
म० पु०	पृच्छेः	पृच्छेतम्	पृच्छेत
उ० पु०	पृच्छेयम्	पृच्छेव	पृच्छेम

अनद्यतनभूते (लङ्)

प्र० पु०	अपृच्छत्	अपृच्छताम्	अपृच्छन्
म० पु०	अपृच्छः	अपृच्छतम्	अपृच्छत
उ० पु०	अपृच्छम्	अपृच्छाव	अपृच्छाम

सामान्यभविष्यति (लृट्)

प्र० पु०	प्रक्ष्यति	प्रक्ष्यतः	प्रक्ष्यन्ति
म० पु०	प्रक्ष्यसि	प्रक्ष्यथः	प्रक्ष्यथ
उ० पु०	प्रक्ष्यामि	प्रक्ष्यावः	प्रक्ष्यामः

एवम् इष् (इच्छ्), मुच् (मुञ्च्) विश्, सृज्, स्पृश्, क्षिप्, दिश्, सिच् (सिञ्च्), कृष्, स्फुर्, विद् (विन्द्), गृ (गिर्, गिल्) प्रभृतयोऽपि ।

तनादिगणः

कृ—करणे

वर्त्तमाने (लट्)

प्र० पु०	करोति	कुरुतः	कुर्वन्ति
म० पु०	करोषि	कुरुथः	कुरुथ
उ० पु०	करोमि	कुर्वः	कुर्मः

प्रवर्त्तनायां (लोट्)

प्र० पु०	करोतु	कुरुताम्	कुर्वन्तु
म० पु०	कुरु	कुरुतम्	कुरुत
उ० पु०	करवाणि	करवाव	करवाम

विधौ (लिङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	कुर्यात्	कुर्याताम्	कुर्युः
म० पु०	कुर्याः	कुर्यातम्	कुर्यात
उ० पु०	कुर्याम्	कुर्याव	कुर्याम

अनद्यतनभूते (लङ्)

प्र० पु०	अकरोत्	अकुरुताम्	अकुर्वन्
म० पु०	अकरोः	अकुरुतम्	अकुरुत
उ० पु०	अकरवम्	अकुर्व	अकुर्म

सामान्यभविष्यति (लृट्)

प्र० पु०	करिष्यति	करिष्यतः	करिष्यन्ति
म० पु०	करिष्यसि	करिष्यथः	करिष्यथ
उ० पु०	करिष्यामि	करिष्यावः	करिष्यामः

क्र्यादिगणः

ज्ञा—ज्ञाने

वर्त्तमान (लट्)

प्र० पु०	जानाति	जानीतः	जानन्ति
म० पु०	जानासि	जानीथः	जानीथ
उ० पु०	जानामि	जानीवः	जानीमः

प्रवर्त्तनायां (लोट्)

प्र० पु०	जानातु	जानीताम्	जानन्तु
म० पु०	जानीहि	जानीतम्	जानीत
उ० पु०	जानानि	जानाव	जानाम

विधौ (लिङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	जानीयात्	जानीयाताम्	जानीयुः
म० पु०	जानीयाः	जानीयातम्	जानीयात
उ० पु०	जानीयाम्	जानीयाव	जानीयाम

अनद्यतनभूते (लङ्)

प्र० पु०	अजानात्	अजानीताम्	अजानन्
म० पु०	अजानाः	अजानीतम्	अजानीत
उ० पु०	अजानाम्	अजानीव	अजानीम

सामान्यभविष्यति (लृट्)

प्र० पु०	ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति
म० पु०	ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ
उ० पु०	ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः

एवम् क्री, प्री, पुष्, मुष्, मृद्, बन्ध् (बध्), ग्रह् (गृह्) प्रभृतयोऽपि ।

चुरादिगण

भक्ष्—भोजने

वर्त्तमाने (लट्)

प्र० पु०	भक्षयति	भक्षयतः	भक्षयन्ति
म० पु०	भक्षयसि	भक्षयथः	भक्षयथ
उ० पु०	भक्षयामि	भक्षयावः	भक्षयामः

प्रवर्त्तनायां (लोट्)

प्र० पु०	भक्षयतु	भक्षयताम्	भक्षयन्तु

म० पु०	भक्षय	भक्षयतम्	भक्षयत
उ० पु०	भक्षयाणि	भक्षयाव	भक्षयाम

विधौ (लिङ्)

	एकव०	द्विव०	बहुव०
प्र० पु०	भक्षयेत्	भक्षयेताम्	भक्षयेयुः
म० प्र०	भक्षयेः	भक्षयेतम्	भक्षयेत
उ० पु०	भक्षयेयम्	भक्षयेव	भक्षयेम

अनद्यतनभूते (लङ्)

प्र० पु०	अभक्षयत्	अभक्षयताम्	अभक्षयन्
म० पु०	अभक्षयः	अभक्षयतम्	अभक्षयत
उ० पु०	अभक्षयम्	अभक्षयाव	अभक्षयाम

सामान्यभविष्यति (लृट्)

प्र० पु०	भक्षयिष्यति	भक्षयिष्यतः	भक्षयिष्यन्ति
म० पु०	भक्षयिष्यसि	भक्षयिष्यथः	भक्षयिष्यथ
उ० पु०	भक्षयिष्यामि	भक्षयिष्यावः	भक्षयिष्यामः

एवम् कथ्, गण्, चिन्त्, चुर् (चोर्), पीड्, रच्, स्पृह्, तल् (ताल्), तड् (ताड्) तुल् (तोल्) भूष्, दृ (दार्), धृ (धार्) प्रभृतयोऽपि धातवः।

आत्मनेपदिनो धातवः

भ्वादिगणः

सेव्–सेवने

लट्

	ए०व०	द्वि०	ब०व०
प्र० पु०	सेवते	सेवेते	सेवन्ते
म० पु०	सेवसे	सेवेथे	सेवध्वे
उ० पु०	सेवे	सेवावहे	सेवामहे

लोट्

प्र० पु०	सेवताम्	सेवेताम्	सेवन्ताम्
म० पु०	सेवस्व	सेवेथाम्	सेवध्वम्
उ० पु०	सेवै	सेवावहै	सेवामहै

विधिलिङ्

प्र० पु०	सेवेत	सेवेयाताम्	सेवेरन्
म० पु०	सेवेथाः	सेवेयाथाम्	सेवेध्वम्
उ० पु०	सेवेय	सेवेवहि	सेवेमहि

लङ्

प्र० पु०	असेवत	असेवेताम्	असेवन्त
म० पु०	असेवथाः	असेवेथाम्	असेवध्वम्
उ० पु०	असेवे	असेवावहि	असेवामहि

लृट्

	एकव०	द्विव०	बहुव०
प्र० पु०	सेविष्यते	सेविष्येते	सेविष्यन्ते
म० पु०	सेविष्यसे	सेविष्येथे	सेविष्यध्वे
उ० पु०	सेविष्ये	सेविष्यावहे	सेविष्यामहे

एवम् क्षम्, याच्, ह्वस्, स्पन्द्, स्मि (स्मय्), स्वाद्, वन्द्, वृध् (वर्ध्), वृत् (वर्त्त्), लज्ज्, रम्, स्पर्ध्, लभ्, रुच् (रोच्), स्वद्, शिक्ष्, भाष्, मुद् (मोद्), यत्, ईक्ष् प्रभृतयः।

अदादिगणः

ब्रू—वचने

लट्

प्र० पु०	ब्रूते	ब्रुवाते	ब्रुवते
म० पु०	ब्रूषे	ब्रुवाथे	ब्रूध्वे
उ० पु०	ब्रुवे	ब्रूवहे	ब्रूमहे

लोट्

प्र० पु०	ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
म० पु०	ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्
उ० पु०	ब्रवै	ब्रवावहै	ब्रवामहै

विधिलिङ्

प्र० पु०	ब्रुवीत	ब्रुवीयाताम्	ब्रुवीरन्

म० पु०	ब्रुवीथाः	ब्रुवीयाथाम्	ब्रुवीध्वम्
उ० पु०	ब्रुवीय	ब्रुवीवहि	ब्रुवीमहि

लङ्

प्र० पु०	अब्रूत	अब्रुवाताम्	अब्रुवत
म० पु०	अब्रूथाः	अब्रुवाथाम्	अब्रूध्वम्
उ० पु०	अब्रुवि	अब्रूवहि	अब्रूमहि

लृट्

	एकव०	द्विव०	बहुव०
प्र० पु०	वक्ष्यते	वक्ष्येते	वक्ष्यन्ते
म० पु०	वक्ष्यसे	वक्ष्येथे	वक्ष्यध्वे
उ० पु०	वक्ष्ये	वक्ष्यावहे	वक्ष्यामहे

शीं—शयने

लट्

प्र० पु०	शेते	शयाते	शेरते
म० पु०	शेषे	शयाथे	शेध्वे
उ० पु०	शये	शेवहे	शेमहे

लोट्

प्र० पु०	शेताम्	शयाताम्	शेरताम्
म० पु०	शेष्व	शयाथाम्	शेध्वम्
उ० पु०	शयै	शयावहै	शयामहै

विधिलिङ्

प्र० पु०	शयीत	शयीयाताम्	शयीरन्
म० पु०	शयीथाः	शयीयाथाम्	शयीध्वम्
उ० पु०	शयीय	शयीवहि	शयीमहि

लङ्

प्र० पु०	अशेत	अशयाताम्	अशेरत
म० पु०	अशेथाः	अशयाथाम्	अशेध्वम्
उ० पु०	अशयि	अशेवहि	अशेमहि

लृट्

प्र० पु०	शयिष्यते	शयिष्येते	शयिष्यन्ते
म० पु०	शयिष्यसे	शयिष्येथे	शयिष्यध्वे
उ० पु०	शयिष्ये	शयिष्यावहे	शयिष्यामहे

दिवादिगणः

मन्—बोधने

लट्

प्र० पु०	मन्यते	मन्येते	मन्यन्ते
म० पु०	मन्यसे	मन्येथे	मन्यध्वे
उ० पु०	मन्ये	मन्यावहे	मन्यामहे

लोट्

प्र० पु०	मन्यताम्	मन्येताम्	मन्यन्ताम्

म० पु०	मन्यस्व	मन्येथाम्	मन्यध्वम्
उ० पु०	मन्यै	मन्यावहै	मन्यामहै

विधिलिङ्

प्र० पु०	मन्येत	मन्येयाताम्	मन्येरन्
म० पु०	मन्येथाः	मन्येयाथाम्	मन्येध्वम्
उ० पु०	मन्येय	मन्येवहि	मन्येमहि

लङ्

प्र० पु०	अमन्यत	अमन्येताम्	अमन्यन्त
म० पु०	अमन्यथाः	अमन्येथाम्	अमन्यध्वम्
उ० पु०	अमन्ये	अमन्यावहि	अमन्यामहि

लृट्

	एकव०	द्विव०	बहुव०
प्र० पु०	मंस्यते	मंस्येते	मंस्यन्ते
म० पु०	मंस्यसे	मंस्येथे	मंस्यध्वे
उ० पु०	मंस्ये	मंस्यावहे	मंस्यामहे

एवं जन् (जा), पद्, विद्-प्रभृतयः ।

(१०) चुरादिगणः

अर्थ्—याचनायाम्

लट्

प्र० पु०	अर्थयते	अर्थयेते	अर्थयन्ते

म० पु०	अर्थयसे	अर्थयेथे	अर्थयध्वे
उ० पु०	अर्थये	अर्थयावहे	अर्थयामहे

लोट्

प्र० पु०	अर्थयताम्	अर्थयेताम्	अर्थयन्ताम्
म० पु०	अर्थयस्व	अर्थयेथाम्	अर्थयध्वम्
उ० पु०	अर्थयै	अर्थयावहै	अर्थयामहै

विधिलिङ्

प्र० पु०	अर्थयेत	अर्थयेयाताम्	अर्थयेरन्
म० पु०	अर्थयेथाः	अर्थयेयाथाम्	अर्थयेध्वम्
उ० पु०	अर्थयेय	अर्थयेवहि	अर्थयेमहि

लङ्

	एकव०	द्विव०	बहुव०
प्र० पु०	आर्थयत	आर्थयेताम्	आर्थयन्त
म० पु०	आर्थयथाः	आर्थयेथाम्	आर्थयध्वम्
उ० पु०	आर्थये	आर्थयावहि	आर्थयामहि

लृट्

प्र० पु०	अर्थयिष्यते	अर्थयिष्येते	अर्थयिष्यन्ते
म० पु०	अर्थयिष्यसे	अर्थयिष्येथे	अर्थयिष्यध्वे
उ० पु०	अर्थयिष्ये	अर्थयिष्यावहे	अर्थयिष्यामहे